28. सिंहासने समासीनोऽग्निवर्ण, पीतवासाः श्रीवत्सं च ब्रह्मसूत्रं च विना हरिवत् भूषणैर्युक्तः द्विभुजः पुष्पपाणिः शक्तिदण्डभृद्वा,
जयापतिः शृङ्गकेतुः, पुष्परथवाहनः, पूर्वाषाढोद्भवः, पुष्परवो विद्यादिबीजो विष्वक्सेनो विष्वक्सेनं शान्तं हरं अमितमिति।
See विमानार्चनाकल्पः, P. 117, Pub. T.T.D. 1926

29. सर्वत्रानपायिगणैः सार्धमाचरेत्। देवीहीने पत्न्यपत्यहानिः मुनिहीने धर्मनाशः, विष्वक्सेनहीने कुलोत्सादनम्।
See काश्यपज्ञानकाण्ड, P. 64, Pub. T.T.D. 1960.

30. अतः परं प्रवक्ष्यामि विष्वक्सेनस्य लक्षणम्।
नवतालायतं बेरं किरीटेन समायतम्॥
ब्रह्मसूत्रं विना सर्वाभरणैरुपशोभितम्।
आकुञ्च्य दक्षिणं पादं वामं पादं प्रसार्य च॥
जयया सुखमासीनं भार्ययाग्निसमप्रभम्।
शक्त्यायुधं दण्डपाणिं पुष्पपाणिं प्रजाहितम्॥
कृत्वार्चयेद्धनार्थी तु पूज्यमानं सदाऽमरैः।
स्थानस्यैवाभिवृद्ध्यर्थं विष्वक्सेनं प्रचक्षते॥
See खिलाधिकार, P. 167 Pub. T.T.D. 1961.

31. उदक्प्राकारपार्श्वे विमानपार्श्वे वा कुबेरैशानयोर्मध्ये दक्षिणाभिमुखः।
See विमानार्चनाकल्पः P. 117

32. शान्तसोमेशयोर्मध्ये ह्यासीनो दक्षिणामुखः।
श्रीवत्सं ब्रह्मसूत्रञ्च विना सर्वं हरेरिव॥
See क्रियाधिकार, P. 45 Pub. T.T.D., 1953.

# 2 नीलकण्ठस्य चपेटाः

वक्रोक्तिकवितासार्वभौमस्य सुगृहीतनामधेयस्य नीलकण्ठदीक्षितस्य कलिबिडम्बनं नूनमद्यतनसमाजे प्रतिपदमस्माभिः दृश्यमानस्य विषमजीवनस्य प्रतिबिम्बमिव प्रतिभाति।

कविकण्ठीरवोऽयं क्रीस्तोः परं सप्तदशशतकाब्दे दक्षिणभारतदेशे दक्षिणार्काटमण्डले आर्णिसमीपस्थिते अडयपालनाम्नि ग्रामे जनिमलभत। गच्छति काले स मदुरै पट्टणमाजगाम। तत्र च बहुकालं स पाण्ड्यराजानामास्थाने बहुषु पदेषु विरराज। अन्ततः दीक्षितः पाण्ड्यराजस्य श्रीतिरुमलनायकस्य प्रधानसाचिव्यमपि निरवहत्। सुप्रसिद्धे पण्डितवंशे श्रीनीलकण्ठदीक्षितस्य जनिरासीत्। मीमांसा-साहित्यादिशास्त्रेषु कृतभूरिपरिश्रमस्य श्रीमतः अप्पयदीक्षितस्य भ्रातृपौत्रोऽयं नीलकण्ठदीक्षितः। दीक्षितेनानेन वार्धके ताम्रपर्णीनदीतीरे पट्टमदैग्रामे शान्तपावनं जीवनं यापितमिति श्रूयते।

महाकविनानेन शिवलीलार्णवं, गङ्गावतरणं, नलचरितनाटकमिति त्रीणि महाकाव्यानि निरमायिषत। कलिविडम्बन - सभारञ्जन-वैराग्यशतकानीति त्रीणि लघुकाव्यानि च तत्प्रणीतानि सुप्रथितानि। वक्रोक्तिविन्यासनिपुणस्य दीक्षितस्य प्रशस्तिरेवमुपजाता पण्डितसमाजे - "नीलकण्ठस्य वक्रोक्तिः सा मुग्धेन्दुकलानिभा" इति।

नीलकण्ठदीक्षितस्य लघुकृतिषु कलिविडम्बनस्य स्थानमन्यादृशम्। शताधिकपद्यात्मके प्रबन्धेऽस्मिन् अद्यतनसमाजे कोणे कोणे अनुभूयमानायाः कुटिलगतेः परिहासः मृदुलमृदुलया पद्धत्या समुपलभ्यते। परिहासास्पदानि कानिचन स्थलानि सहृदयहृदयाह्लादाय परिदर्शयितुमेव तावदस्य जनस्यासौ

प्रयत्नः ।

## १. वादविजयः

दीक्षितस्य काले शास्त्रार्थगोष्ठीबहुलाः राजसभाः समभवन्। तत्र विजयः कथं सम्पादनीयः ? दीक्षित उपायं कञ्चिदुपदिशत्येवम्--

उच्चैरुद्घोष्य जेतव्यं मध्यस्थश्चेदपण्डितः ।
पण्डितो यदि तत्रैव पक्षपातोऽधिरोप्यताम् ॥

मध्यस्थः पुरुषः यद्यपण्डितः तर्हि उच्चैरुद्घोष्य जयः सम्पादनीयः। यदि स पण्डितः, तस्मिन् पक्षपातमारोप्य जयः लब्धव्यः। प्रायः वादेषु प्रवर्तमानं कोलाहलं दृष्ट्वा दीक्षित एवमुपजहासेति चिन्त्यते।

## २. पाण्डित्यगर्वः

'अहमेवोत्तमोपाध्याय' इति 'मत्प्रणीताः ग्रन्थाः निरतिशया' इति पण्डितानामपण्डितानाञ्चावलेपः अद्याप्यस्माभिः प्रतिपदमनुभूयते। एतत्परम्परा प्रवर्तकान बहुपण्डितान् नीलकण्ठ एवमुपहसति -

पाठनैर्ग्रन्थनिर्माणैः प्रतिष्ठा तावदाप्यते।
एवञ्च तथ्यव्युत्पत्तिरायुषोऽन्ते भवेन्न वा ॥

तथ्यव्युत्पत्तिरूपं तत्त्वज्ञानं मृषापाठनैः मिथ्याग्रन्थनिर्माणैः दुर्लभम् । लोकवञ्चनाय स्वोदरपूरणाय च तन्महदुपकरोतीति तु सत्यम्।

## ३. किमयं कठिनः ?

केषाञ्चिदध्यापकानां नास्ति दुर्बोधः ग्रन्थः । अतिकठिनोऽयमिति विद्वत्तल्लजैः ऊरीकृतमपि ग्रन्थं केचन अनायासेन अत्यल्पे काले परिसमापयन्ति। विदुषामेवायमाश्चर्यकर उदन्तः। दीक्षितस्सनिपुण तादृशानध्यापकापसदानुपहसति। । पश्यत -

वाच्यतां समयोऽतीतः स्पष्टमग्रे भविष्यति।
इति पाठयतां ग्रन्थे काठिन्यं कुत्र वर्तते ?

## ४. मूर्खाचार्यस्य भाग्यम्

मूर्खाचार्यस्य भाग्यं इयदिति वक्तुं न शक्यते। येन भाग्येन स आचार्य उपजातः तदेव भाग्यं कांश्चन शिष्यान् तत्सविधमानयति, येषु अगतित्वम्, अतिश्रद्धा, ज्ञानाभासेन तृप्तत्वमिति त्रयः गुणाः विलसन्ति। तैश्च गुणैः आचार्यस्य तस्य मौर्ख्यं सुप्रतिष्ठितं भवति। पश्यत नीलकण्ठः कथं मूर्खानाचार्यानुपहसतीति -

अगतित्वमतिश्रद्धा ज्ञानाभासेन तृप्तता।
त्रयः शिष्यगुणा ह्येते मूर्खाचार्यस्य भाग्यजाः॥

## ५. मौहूर्तिकयुक्तिः

यदि दैवज्ञं पृच्छाम "कालोऽयं ममानुकूलः प्रतिकूलो वेति" कथयति व्यामिश्रं फलम्। न कदाचिदपि एककोटिकं फलं शुभस्याशुभस्य वा निर्णीतं कालञ्च सङ्गिरते। यदि कश्चित् आयुर्मम दीर्घं वा अल्पं वेति ज्यौतिषिकं पृच्छति तर्हि दीर्घायुरित्येव स समाधत्ते। तत्र युक्तिरियं मौहूर्तिकस्य। स जीवेच्चेत्, अवश्यमेनं बहुमन्यते। अथ वा स मृतश्चेत् को वा पुनरेनं प्रक्ष्यति? अहो! विचित्रेयं कल्पना कस्य वा जनस्य हासं नोत्पादयति? शृणुत -

आयुःप्रश्ने दीर्घमायुर्वाच्यं मौहूर्तिकैर्जनैः।
जीवन्तो बहुमन्यन्ते मृताः प्रक्ष्यन्ति कं पुनः॥

## ६. दैवज्ञाभासाः

प्रायो दैवज्ञेषु लैकिकेषु शास्त्रज्ञानं मृग्यमेव भवति। केचिद्वारान् जानन्ति। अन्ये ग्रहान् जानते। अपरे च नक्षत्राणि विदन्ति, त्रयाणामेतेषां ज्ञानं बहूनां नैव भवति। यदि कश्चित् त्रितयमिदं जानाति तर्हि स बृहस्पतिरित्येव वक्तव्यम्। इयं रीतिरद्याप्यस्माभिरनुभूयते समाजे। पश्यत कथं नीलकण्ठ आवेदयति तत्त्वमिदम्

वारान् केचिद् ग्रहान् केचित्केचिदृक्षाणि जानते।
त्रितयं चेत् विजानन्ति ते वाचस्पतयः स्वयम्॥

## ८. अज्ञातभोक्तृगणः

गृहस्थाश्रमनिर्वाहः नातीव सुकरः। बहुकुटुम्बिनां तु अवस्थाः कीदृशा इति

वर्णयितुं न शक्यते। जामातरः, भागिनेयाः, मातुलाः, कलत्रपक्षीयाः, एकैकशः आहत्य च समागताः अन्यैर्यथा न ज्ञायेत तथा सर्वं आखुवत् भक्षयन्तीति परान्नभोजिनां स्वार्थपराणां वृत्तिं कथं दीक्षितः विमृशतीति पश्यत-

जामातरो भागिनेया मातुला दारबान्धवाः।
अज्ञाता एव गृहिणां भक्षयन्त्याखुवद् गृहे॥

## ८. कन्यालोभः

कन्यानां लोभः अधिकः। यदि ताः स्वमातृगृहमायान्ति सकृत् भूषणानीति, वस्त्राणीति, पात्राणीति पुत्रोपलालनोपकरणानीति स्वमातृगृहे समुपलभ्यमानं समस्तमपि भर्तृगृहं नयन्ति। कृतोद्वाहानां तासां भर्तृगृह एव प्रीतिः न मातृगृह इति यत्सत्यं तदेवं निरूपयति नीलकण्ठः -

भूषणैर्वसनैः पात्रैः पुत्राणामुपलालनैः।
सकृदागत्य गच्छन्ती कन्या निर्माष्टि मन्दिरम्॥

## ९. अश्रान्तकलहयोगः

ज्योतिश्शास्त्रे ग्रहसंयोगः योगप्रदः। तथैव कस्मिंश्चिद् गृहे कस्यचन गृहस्थस्य यदि पुत्रशालिन्यौ भार्ये द्वे, पतिवर्जिता भगिनी च निवसन्ति तर्हि "अश्रान्तकलहः" इति नूतनः योगः सम्पद्यते। अर्थात् तैः क्रियमाणः कलहः न कदाचिदपि श्रान्तिमेष्यति। तस्य योगस्य महिमा अनितरसाधारण इति नीलकण्ठस्य चमत्कारावहां कल्पनां पश्यत -

भार्ये द्वे पुत्रशालिन्यौ भगिनी पतिवर्जिता।
अश्रान्तकलहो नाम योगोऽयं गृहमेधिनाम्॥

## १०. महदभूतम्

दुष्करदारिद्र्यपीडितः ऋणान्यादत्ते। स्वयं दरिद्रः कथं वा झटिति ऋणापाकरणाय प्रभवेत्। ऋणदाता, उत्तमर्णः धननाशमुत्प्रेक्ष्य कथञ्चित्तस्माद्धनं संपादनीयमिति प्रयतते तराम्। तत्समये अधमर्णस्य उत्तमर्णः भूतमिव प्रतिभाति। दारिद्र्येण पीड्यमानस्य तस्य अधमर्णस्य उत्तमर्णस्मरणमपि गात्रावसादाय कल्पते। तद्दर्शनं पुनः प्रज्ञामपहन्ति। अन्तकाधिकतया अन्तकालापेक्षां विनैव उत्तमर्णः लोके धनप्रत्यर्पणाय क्लेशयति जनम्।

यद्यपि तस्य हस्ते पाशं न विद्यते, मुखे दंष्ट्रा च न भवति अथापि

उत्तमर्णदर्शनमेव महोद्वेगमुपजनयतीति लोके प्रवर्तमानां वस्तुस्थितिं सचमत्कारं नीलकण्ठ एवमभिवर्णयति -

स्मृते सीदन्ति गात्राणि दृष्टे प्रज्ञा विनश्यति।
अहो ! महदिदं भूतमुत्तमर्णाभिशब्दितम् ॥
अन्तकोऽपि हि जन्तूनामन्तकालमपेक्षते।
न कालनियमः कश्चिदुत्तमर्णस्य विद्यते ॥

न पश्यामो मुखे दंष्ट्रां न पाशं वा कराञ्चले।
उत्तमर्णमवेक्ष्यैव तथाप्युद्विजते मनः ॥

## ११. श्रीमदः

अल्पसत्त्वानुन्मत्तीकरोति श्रीमदः । अनायासप्राप्तश्रीमदान्धानां जनानां आत्मस्तुतिपरेषु वाक्येषु प्रामाण्यबुद्धिः, स्वविषये देवताबुद्धिः, अन्यमानवविषये कीटबुद्धिश्च भवति। धनमदमत्तः परैरभिधीयमानं शृण्वन्नेव पुनः पुनः पृच्छति । पश्यन्नपि न जानाति । परैः क्रियमाणान् परिहासानपि स्तोत्राणीति ते भावयन्ति । श्रीमदान्धानिमान् आवृत्य पार्श्वस्थाः जनाः अन्योन्यं भाषमाणाः बालोन्मत्तपिशाचवत् परिहसन्ति । ग्रहावेशः क्षणमात्रमेव तिष्ठति । सुरामदः याममात्रमेव भवति। मूर्खेषु श्रीमद आजीवितं अनुवर्तत इति महच्चित्रम्।

अनायाससाधितधनावलेपदग्धानां केषाञ्चिज्जनानां कथं दीक्षितः चपेटां करोतीति अस्माभिरत्रावलोकयितुं शक्यते -

प्रामाण्यबुद्धिः स्तोत्रेषु देवताबुद्धिरात्मनि।
कीटबुद्धिर्मनुष्येषु नूतनायाः श्रियः फलम् ॥

शृण्वन्त एव पृच्छन्ति पश्यन्तोऽपि न जानते।
विडम्बनानि धनिकाः स्तोत्राणीत्येव मन्वते ॥

आवृत्य श्रीमदेनान्धानन्योन्यकृतसंविदः।
स्वैरं हसन्ति पार्श्वस्था बालोन्मत्तपिशाचवत् ॥

क्षणमात्रं ग्रहावेशो याममात्रं सुरामदः।
लक्ष्मीमदस्तु मूर्खाणामादेहमनुवर्तते ॥

## १२. खलवृत्तम्

खलवृत्तिः विचित्रतरा। सर्वदा तेषां हृदयं परच्छिद्रान्वेषण एव प्रवर्तते। तेषां

श्रोत्रं परवार्ताश्रवण एव व्यापृतम्। तेषां वाणी परमर्मघातिनी भवतीति चमत्करोति नीलकण्ठः -

परच्छिद्रेषु हृदयं परवार्तासु च श्रवः।
परमर्मसु वाचं च खलानामसृजद्विधिः ॥

## १३. कर्णेजपः

केषाञ्चिज्जनानां कर्णेजपत्वं निसर्गसिद्धम्। कर्णेजपैः सर्वेऽनर्थाः सम्भवन्ति तत्रापि यदि राजकर्णेजपत्वं तर्हि तत् राष्ट्रनाशायैव भवति। अतः सर्वकर्मनाशकं कर्णेजपत्वं विमृशत्येवं नीलकण्ठः।

गोकर्णे भद्रकर्णे च जपो दुष्कर्मनाशनः।
राजकर्णेजपः सद्यः सर्वकर्मविनाशनः ॥

गोकर्णक्षेत्रे तथा भद्रकर्णक्षेत्रे च जपः क्रियते चेत् पुराकृतानि दुष्कर्माण्येव नश्यन्ति। यदि राजकर्णेजपत्वं तर्हि सद्य एव सर्वाण्यपि कर्माणि नाशं प्राप्नुवन्ति। राजाग्रहेण सर्वस्यापि नाश इति तात्पर्यम्।

## १४. लोभप्रभावः

लोभगुणस्य शक्तिः कियतीति वर्णयितुं न शक्यते। लोभवतां जनानां जीवनदृष्टिरेवान्यादृशी। आचरणीयेषु धर्मेषु लोभिनां शुष्कोपवासः अत्यन्तं प्रियतमः धर्मः। चिकित्सासु लङ्घनमेव तेषां परमं भेषजम्। विभिन्नेषु यज्ञेषु जपयज्ञ एव तेषां महती प्रीतिः।

अभ्यर्थनाभङ्गः कदाचिदत्र भवेद्वेति अर्थी, याचकोऽसौ किं वा प्रक्ष्यतीति लुब्धश्च युगपदेव उद्विजेते। लोकेऽस्मिन् अतिथिजनायार्पितं कबलं लोकान्तरे मेरुपर्वताधिकं सत्फलं दात्रे दास्यतीति आतिथ्यशास्त्रार्थः। किन्तु दीनेभ्यः दीयमानं एकैकं भिक्षाकबलं मेरुसमानं भावयन्ति लोभिन इति आतिथ्यशास्त्रार्थं ते साक्षात्कुर्वन्ति।

धनपालः पिशाचः अन्येभ्यः धनं संरक्ष्य स्वामिने प्रत्यर्पयति। किन्तु पिशाचसदृशः धनलुब्धस्तु कस्मैचिदपि किञ्चिन्न दातुमिच्छति। महता कष्टेन सम्पादितमिममर्थं तदनन्तरं न कोऽपि रक्षेदिति विज्ञायापि कथञ्चित् स्वयमपि किञ्चिदेव भुङ्क्ते। यथाकथञ्चित् अन्येभ्यो न दित्सति स्वयमपि नानुभवितुमिच्छतीति भावः। नीलकण्ठदीक्षित एवं लुब्धस्वभावं बहुधा स्वाभाविक्या

पद्धत्या सम्यग्भिवर्णयति। पश्यत -

शुष्कोपवासो धर्मेषु भैषज्येषु च लङ्घनम्।
जपयज्ञश्च यज्ञेषु रोचते लोभशालिनाम्॥

किं वक्ष्यतीति धनिको यावदुद्विजते मनः।
किं प्रक्ष्यतीति लुब्धोऽपि तावदुद्विजते ततः॥

सर्वमातिथ्यशास्त्रार्थं साक्षात्कुर्वन्ति लोभिनः।
भिक्षाकबलमेकैकं ये हि पश्यन्ति मेरुवत्॥

धनपालः पिशाचो हि दत्ते स्वामिन्युपस्थिते।
धनलुब्धः पिशाचस्तु न कस्मै चन दित्सति॥

स्वस्मिन्नसति नार्थस्य रक्षकः सम्भवेदिति।
निश्चित्यैव स्वयमपि भुङ्क्ते लुब्धः कथञ्चन॥

## १५. कलये नमः

खलप्रभावः दुरुन्नेयः। कलिप्रभावः दुरधिगमः। किमस्माभिः प्रतिविधातव्यम्। शुभं वाऽशुभं वा कर्म अवश्यमनुभोक्तव्यमेव। कलियुगे तावदेतावता दशमांशेन समस्तः काल दारुणा इव भाति। किं केवलं पुच्छलग्नेन विषेण वृश्चिकः लोकस्य पीडाकरः न भवति ?

युगेऽस्मिन् भार्यागिर एव वेदाः, धनसम्पादनसाधनं धर्मः, स्वप्रतिभैव सर्वेषां प्रमाणं न तु परैरुपदिश्यमानं हितम्। तादृशाय कलये नमोऽस्त्विति नीलकण्ठदीक्षितः स्वलघुप्रबन्धं कलिविडम्बनाख्यमुपसंहरति।

विषेण पुच्छलग्नेन वृश्चिकः प्राणिनामिव।
कलिना दशमांशेन सर्वः कालोऽपि दारुणः॥
यत्र भार्यागिरो वेदाः यत्र धर्मोऽर्थसाधनम्।
यत्र स्वप्रतिभा मानं तस्मै श्रीकलये नमः॥

नीलकण्ठदीक्षितस्य वक्रोक्तिः हरजटालग्ना मुग्धेन्दुकलेव समिन्धे संस्कृतसाहित्ये। कलिविडम्बनशतकद्वारा तदानीन्तनान् विकटान् सन्दर्भान् सुललितया भणित्या विमृशति दीक्षितः। विमर्शमिममपेक्षतेऽद्यतनसमाजोऽपि। प्रकृते विकृतेऽस्मिन् समाजे नीलकण्ठस्य कलिविडम्बनं सर्वांशेनान्वर्थमित्यत्र न काचिदप्यतिशयोक्तिः।

# 3 नयवीथीविमर्शः *

## १. प्रबन्धसारः

इदं हि नामापरोक्षं प्रेक्षावतां यत् प्राभाकरमीमांसकमूर्धन्येन शालिकानाथमिश्रेण प्रणीतेषु प्रकरणेषु नयवीथीनामकं प्रकरणमद्वितीयमख्यातिवादप्रतिपादकमिति । तत्राख्यातिवादस्वरूपं मिश्रेण सप्रमाणं प्रत्यपादि प्राभाकरसम्प्रदायानुरोधम् । मतमिदं प्रागेव मण्डनमिश्रोम्बेकप्रभृतिभिः परास्तं विभ्रमविवेकादिषु, मण्डितञ्च भवनाथादिभिः महता प्रबन्धेन स्वप्रबन्धेषु ।

अतः पत्रेऽस्मिन् अख्यातिवादः किंप्रयोजनकः, कुतश्च प्राभाकराणां तत्प्रतिपादनाभिनिवेशः, कस्माच्चान्येषां तन्निराकरणे महानाग्रह इति सविमर्शं समीक्ष्यते ।

## २. ख्यातिवादाः

अप्रमा, अयथार्थानुभवः, भ्रमः, विपर्ययः, मिथ्याज्ञानम्, ख्यातिरित्यनर्थान्तरमिति निश्चप्रचं विचक्षणमण्डलीषु । कामपि ख्यातिमनभ्युपगच्छतां अख्यातिवादिन इति विख्यातानां प्राभाकराणामपि उपर्युक्तार्थेषु ख्यातिपदप्रयोगे न कापि विप्रतिपत्तिः । तत्त्वतस्ते भ्रमापरपर्यायां ख्यातिं नोररीकुर्वन्तीत्यन्यदेतत् ।

*This paper was read in the 31st All India Oriental Conference, Jaipur in 1982.

ते चेमे ख्यातिवादाः प्रदिदर्शनं बहुभेदभिन्नाः दरीदृश्यन्ते । श्रीशङ्करभगवत्पादावधि प्रसिद्धाः पञ्च ख्यातिवादाः विलसन्ति । [1] यथा - (१) आत्मख्यातिः सौत्रान्तिकवैभाषिकयोगाचाराणाम् (२) असत्ख्यातिः माध्यमिकानाम् (३) अख्यातिः प्राभाकराणाम् (४) अन्यथाख्यातिः नैयायिकभाट्टजैनानाम् (५) अनिर्वचनीयख्यातिः अद्वैतिनामिति। ततः परं प्रत्यप्रतया वक्ष्यमाणाः पञ्चान्ये प्रादुर्भूताः ख्यातिवादाः । यथा - (१) विशिष्टाद्वैतिनां यथार्थख्यातिः (२) द्वैतिनां अभिनवान्यथाख्यातिः (३) चार्वाकाणां प्रसिद्धार्थख्यातिः (४) अलौकिकार्थख्यातिः केषाञ्चित् (५) सदसत्ख्यातिः साङ्ख्यानामिति।

## ३. अख्यातिवादः

सत्स्वेवं बहुषु ख्यातिवादेषु नास्त्येव कापि ख्यातिरिति प्रतिपादयताम् अत एव अख्यातिवादिन इति विख्यातानां प्राभाकराणां पन्थास्तावदेवं चकास्ति। एषा हि तेषां परिभाषा - सर्वं ज्ञानं यथार्थम् [2] । नास्त्येव भ्रमात्मकं अयथार्थं ज्ञानम् । न चैवं कथं नाम भ्रान्ता भ्रान्तव्यवस्थोपपद्यत इति वाच्यम् । यथा अन्येषां ज्ञानत्वसामान्ये सत्यपि किञ्चिद् यथार्थं, किञ्चिदयथार्थमिति व्यवस्था समुपपद्यते, तथैव ज्ञानस्य सर्वस्य यथार्थतायामपि भ्रान्ताभ्रान्तव्यवस्थाता उपपत्तिः । इयान् विशेषः - यदन्येषां ज्ञानस्वरूपबाधेनायथार्थत्वम् ; एतन्मते तु व्यवहारबाधेन अयथार्थत्वम्। अतः यथार्थायथार्थभेदे यो हि नाम हेतुः स एव भ्रान्ताभ्रान्तविवेकेऽपि इति विज्ञेयम्।[3]

नन्वेवं नास्ति यदि भ्रमात्मकं ज्ञानम्, एवं खलु वक्तव्यम् - 'शुक्तौ रजतज्ञानं न जातमि' ति । तर्हि कथं नाम शुक्तिकायां रजतप्रवृत्तिः ? इति चेत् न । शुक्तावेव रजतज्ञानमङ्गीकार्यमिति को नियमः ? रजते रजतज्ञानमात्रादेव शुक्तौ रजतप्रवृत्तिरुपपद्यते यदि अन्यावभासिनः ज्ञानस्य अन्यत्र जननमपि मृग्यमेव।

ननु यदि सर्वेषां ज्ञानानां यथार्थत्वमभ्युपगम्यते तर्हि केषाञ्चित् पुनः भ्रान्तित्वं नोपपद्यते, अतः अवश्यं भ्रान्तेरङ्गीकार्यतया अयथार्थज्ञानमनपलपनीयम्। न च विवेकाग्रहणस्येव भ्रन्तित्वमस्तु इति वाच्यम्। ग्रहणस्य हि भ्रान्तित्वेन अभ्युपगम्यमानत्वात्। यदि अग्रहणस्य भ्रान्तित्वमङ्गीकार्यं तर्हि सुषुप्त्यवस्थायां बाह्येन्द्रियैरुपरतैः सर्वभेदापरिग्रहात् तत्र अतिव्याप्तिः स्यात्। एवं स्थाणुर्वा पुरुषो वेति सन्देहे स्थाणुपुरुषोभयरूपस्यार्थस्याभावात् कथं नाम यथार्थत्वं तत्रोपपादयितुं शक्यते ? अतः अयथार्थज्ञानमवश्यमभ्युपगन्तव्यमेवेति चेत्[4] -

मैवम् । ज्ञानानां विषयाव्यभिचारितया सर्वस्यापि उपपद्यमानत्वात्। तथाहि - को नाम विषयः? यस्मिन् ज्ञाने सति यः खल्वर्थः तत्र भासते स एवार्थः तस्य ज्ञानस्य विषयः। अर्थस्य हि प्रतीतिविषयत्वं भासनमेव; न व्यवहारयोग्यतापत्तिविषयत्वम् । निर्विकल्पस्य निर्विषयत्वप्रसङ्गात् । स्वव्यवहारानुगुणायाः प्रतीतेः स्वस्मिन् वर्तनमेव भासनमुच्यते। व्यवहारश्चात्र मानसकायिकभेदेन द्विविधः । बुद्धिसुखदुःखेच्छादिरूपः वाचकशब्दप्रयोगो त्रा मानसः। कायिकश्च चतुर्विधेषु महत्सु द्रव्येषु उपादानादिरूपः । अतः "इदं रजतम्" इत्यत्र शुक्तौ रजतमेव भासते न तु शुक्तिः । तेन "इदम्" इति ज्ञानं पुरोवर्तिनि व्यवहारानुगुणमेवेति यथार्थम् । रजतम् इति ज्ञानं रजतत्वावच्छिन्ने व्यवहारानुगुणमेवेति तदपि यथार्थमेव। तथा चायं प्रयोगः शुक्ती रजतत्वेन न प्रकाशते, तद्रूपेणासत्त्वात्। यद् यद्रूपेण असत् तत् तेनाकारेण न प्रकाशते। यथा आकाशं पङ्कजरूपेणेति [6]।

न च तर्हि पुरः स्थितस्य अरजततया, देशान्तरस्थितस्य रजतस्य अत्र असन्निहिततया च रजतज्ञाने कारणं नास्तीति वाच्यम्। पुरःस्थितस्य शुक्तिशकलस्य भेदवर्जिततया गृह्यमाणत्वात् । शुक्तिकायाः रजताद् भेदजनकाः विशेषाः दोषाभिभवात् न ज्ञाताः । सामान्यरूपता केवलं ज्ञाता । रजतसदृशशुक्तिदर्शनात् सामान्यमात्रग्रहणाच्च, रजते जायमाना स्मृतिः मानसदोषवशात् तदित्यंशेन रहिता, शुक्तेरविवेचिता समुत्पन्नेति[7] । अतः प्राभाकरमतेऽस्मिन् सर्वेषां ज्ञानानां याथार्थ्यनिबन्धनं प्रामाण्यमुपपद्यत एव। तथा च प्रयोगः - "सर्वे विगीताः सन्देहविभ्रमाः यथार्थाः, प्रत्ययत्वात् इदं रजतमिति प्रत्ययवत्"।

ननु 'उष्णं जलम्' 'शीतश्शीतमयूखः' 'सुवर्णं गुरुतरम्' इत्यादौ व्यवहाराविसंवाददर्शनात् स्यादेव समीचीनत्वमिति चेत् न। भेदाग्रहनिमित्तत्वात् तादृशज्ञानानाम्। विद्यमानापि भ्रान्तता न व्यवहारपदमुपनीता। अतः ज्ञानं सर्वमपि यथार्थमेवेति अयथार्थभावात् अख्यातिवादसिद्धिः (त.र. 2-8)

## ४. अख्यातिवादस्य खण्डनमण्डनपरम्परा

इदम्प्रथमतया प्राभाकरप्रस्थानव्यवस्थापकेन सप्तमशतकवासिना प्रभाकर गुरुणा व्यवस्थापितोऽसावख्यातिवादः तदनन्तरकालिकैः बहुभिर्दार्शनिकैर्विचारितः । तत्र सत्स्वप्यन्येषु बहुषु प्रतिपक्षेषु भाट्टमीमांसकाः प्रथमस्मरणार्हाः भवन्तीत्यपरोक्षं प्रेक्षावताम्। तत्र सप्तमशतकवासी पण्डितमण्डलीमण्डनायमानो मण्डनमिश्रः भाट्टमतानुयायी स्वकीये विभ्रमविवेके अख्यातिवादं महता

प्रबन्धेन खण्डयामास। ततः पश्चादष्टमशतकवासिना भाट्टमीमांसकेनोम्बेकभट्टेन स्वश्लोकवार्तिकव्याख्यायां तात्पर्यटीकाख्यायां भाट्टमतानुकूलायाः अन्यथाख्यातेः व्यवस्थापनद्वारा अख्यातिवादः निरसितः।

एवमख्यातिवादे प्रतिपक्षिभिः भाट्टमीमांसकैः सप्तमाष्टमशतकवासिभिः प्रतिक्षिप्ते, अष्टमशतकाब्दे प्रादुर्भूतेन ऋजुविमला-प्रकरणपञ्चिका - भाष्यपरिशिष्टादिभिः अत्युत्तमैः ग्रन्थैः प्राभाकरसम्प्रदायप्रकाशकेन शालिकानाथ-मिश्रेण स्वकीये व्याख्यानद्वये नयवीथीनामके प्रकरणे च अख्यातिवादस्वरूपं सम्यक् प्रत्यपादि। यस्य च वादप्रौढिम्ना पराहता भाट्टाः प्रायः शताब्दद्वयं यावत् तूष्णीभावमाश्रिताः। एवञ्च नवमदशमशतकयोः प्रायः न केनापि भाट्टमीमांसकेनायं वादः परास्तः । अत एवं वक्तुं शक्यते यत्-नवमदशमशतकयोरस्य वादस्यासीन्महत् प्राबल्यमिति।

यद्यपि भाट्टमीमांसासम्प्रदायानुयायिभिः वादोऽयं न खण्डितः, तथापि नवमशतकवासिना वाचस्पतिमिश्रेण स्वन्यायवार्तिकतात्पर्यटीकायां, भामत्याञ्च अख्यातिवादोऽयं न युक्तिसह इति न्यरूपि। ततः पश्चाद्दशमशतकनिवासिना सुचरितमिश्रेण श्लोकवार्तिकव्याख्यायां काशिकाभिधायां, तस्मिन्नेव समये लब्धजनुषा महामीमांसकेन पार्थसारथिमिश्रेण (१०००-११२०) शास्त्रदीपिकायाञ्च अन्यथाख्यातिरेव साधीयसीति प्रतिपादयद्भिः अख्यातिवादः बहुधा परीक्षितः।

नयविवेककर्त्रा भवनाथेन प्राभाकरमीमांसासम्प्रदायव्यवस्थापकेन पुनः एकादशशतकाब्दे अख्यातिवादः सोपष्टम्भं समर्थितः । त्रयोदशशतकवासिना नन्दीश्वरेण(१२२०-१३००) प्रभाकरविजये, अष्टादशशतकप्रादुर्भूतेन रामानुजाचार्येण तन्त्ररत्ननाम्नि प्राभाकरमीमांसाप्रकरणग्रन्थे शालिकानाथानुरोधं नास्ति ख्यातिरित्य ख्यातिवाद एव समर्थितः। एवं भाट्टप्राभाकरमीमांसकेषु विषयेऽस्मिन् परस्परं खण्डनमण्डनानि बहुधा सम्भूतानि, येषामध्ययनेन जायेतावश्यं प्रश्नो मनसि कुतः प्राभाकराणामख्यातिवादाङ्गीकारे इयानाग्रहः ? कुतो वा प्रतिपक्षिणां तत्खण्डनाय भूयानभिनिवेश इति।

## ५. अख्यातिवादाभिनिवेशः किन्निबन्धनः ?

प्राभाकरैरेभिः किमर्थं वा भूयानाग्रहः प्रदर्श्यते तावदख्यातिवादव्यवस्थापने इत्यालोचने क्रियमाणे द्वित्राणि कारणान्यस्माभिरुद्भावयितुं शक्यते।

तत्र सर्वप्रथममिदम् - यथाकथञ्चित् वेदवाक्यजन्यबोधस्य सर्वस्यापि प्रामाण्यं सम्पादनीयम्। प्रामाण्यञ्च स्वत एवेति तेऽभ्युपगच्छन्ति। अतः सामान्यतः सर्वेषां ज्ञानानां प्रमाण्ये याथार्थ्ये च साधिते ज्ञानरूपे वेदे याथार्थ्यं सुप्रतिष्ठितं भवति। तत्र भ्रमादिशङ्काया एव नावकाश इति वेदरूपशब्दप्रामाण्यं अनवयवेन सिद्धयति। तत्र अप्रामाण्यशङ्काया एवानुदयः। तर्हि भ्रम-प्रमाविवेकः लोकेऽनुभूयमानः किमर्थः ? लौकिकेषु अवशिष्टेषु प्रमाणेषु व्यवहारनिर्वाहार्थः। प्राभाकराणामियं भीतिः यत् यदि भ्रमस्य मनागवकाशः दीयते तर्हि सत्यत्वसिद्धान्तस्य हानिः। "अनुभूतिः प्रमा" इति सर्वासामनुभूतीनां प्रमात्वबाधः अविवेकस्य च प्रवेश इति। अतस्ते भ्रमं सर्वथा दूरीकर्तुं यतन्ते। एतच्चिन्त्यम् - तदर्थं किमेतावान् प्रयासः स्वीकर्तव्य इति ?

द्वितीयं प्रयोजनम्-लिङर्थः अपूर्वमिति प्राभाकराणां सिद्धान्तः। अख्यातिवादाङ्गीकारेण तस्यापि प्रामाण्यं सुष्ठु व्यवस्थापितं भवति। तथाहि - कार्यम्, अपूर्वम्, नियोग इत्यनर्थान्तरं प्राभाकरसम्प्रदाये। स्वर्गकामाधिकरणबादर्यधिकरणयोः तथा अपूर्वाधिकरणदेवताधिकरणयोश्च तत्स्वरूपं सुष्ठु प्रपञ्चितं प्रभाकरैः। वैदिकानि पदानि स्वभावसिद्धया अन्विताभिधानानुकूलया शक्त्या बोधं जनयन्ति। स च बोधः स्वतःसिद्धप्रामाण्यशाली। अतः अप्रामाण्यशङ्काविरहितः स बोधः पुरुषं कार्ये प्रवर्तयितुमीष्टे इति।

तृतीयं प्रयोजनम् - सविकल्पकज्ञानानि सर्वाण्यपि भ्रमरूपाणीति कथयन्ति योगाचाराः। तन्मतनिरसनं सर्वेषामपि ज्ञानानां प्रमात्वसाधनञ्च तृतीयं प्रयोजनम्।

एवमभ्यूहितुं शक्यन्ते अन्यान्यपि प्रयोजनान्यख्यातिवादस्य। स्वयमेव शालिकानाथेनैतत्प्रकरणस्य प्रयोजनमेवमभिधीयते -

विषयाव्यभिचारित्वं साधयितुं सर्वसंविदामेषा।
निरमीयत नीतिविदा शालिकनाथेन नयवीथी॥

कुतः अन्येषां तत्खण्डनाग्रहः ? - तत्तन्मतपरिपोषार्थं तैस्तैर्दार्शनिकैः यद्यपि बहवः ख्यातिवादा अङ्गीकृताः। सूक्ष्मेक्षिकया परीक्षायां क्रियामाणायाम् इदं तावत् स्पष्टमनुभूयते तत्त्वम् - यत् प्रासादमध्यस्थितस्य कस्यचिद्वस्तुनः विविधवातायनेभ्यः अनुभूयमानं दर्शनं यथा विभिन्नं, तथा वादिनां दर्शनान्यपि विभिन्नानि। न तावता तत्राप्रामाण्यकोलाहल आवश्यक इति।

NOTES :

1. आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
[तथानिर्वचनख्यातिरित्येतत्ख्यातिपञ्चकम्] ॥
परीक्षकाणां विभ्रान्तौ विवादात्मा विविच्यते ॥ वि. वि. १.

2. यथार्थं सर्वमेवेह विज्ञानमिति सिद्धये ।
प्रभाकरगुरोर्भावः समीचीनः प्रकाश्यते ॥ प्र.प. ४३.

3. प्र. वि. १६ - १७

4. इदं रजतमित्येषा या शुक्तिशकले मतिः ।
सा चेद्यथार्था, भ्रान्तित्वं तदा तस्यास्तु कीदृशम् ॥

विवेकाग्रहणं भ्रान्तिरिति चेन्नैतदीदृशम् ।
सुषुप्तेऽपि भ्रमापत्तेः सर्वभेदापरिग्रहात् ॥

"स्थाणुर्वा पुरुषो वे" ति सन्देहो योऽपि जायते ।
अभावात्तादृशोऽर्थस्य स यथार्थः कथं भवेत् ॥ प्र.प. ४८

5. यस्यां संविदि योऽर्थोऽवभासते स तस्या विषयः, नान्यः, तस्य तत्रानवभासात् ।
अनवभासमानस्य विषयत्वेऽतिप्रसङ्गात् । त. १. २ ; प्र. वि १७-१८ ।

6. अत्र ब्रूमो य एवार्थो यस्यां संविदि भासते ।
बोधः स एव नान्यद्धि विद्याद्वेद्यस्य लक्षणम् ॥

इदं रजतमित्यत्र रजतं चावभासते ।
तदेव तेन वेद्य स्यान्न तु शुक्तिरवेदनात् ॥
प्र. प. ४८-४९.

7. नन्वेवं रजताभासः कथमेष घटिष्यति ।
उच्यते शुक्तिशकलं गृहीतं भेदवर्जितम् ॥

शुक्तिकाया विशेषा ये रजताद् भेदहेतवः ।
ते न ज्ञाता अभिभवात् ज्ञाता सामान्यरूपता ॥

अनन्तरं च रजते स्मृतिर्जाता तथापि च ।
मनोदोषात् तदित्यंशपरामर्शविवर्जितम् ॥

रजतं विषयीकृत्य नैव शुक्तेर्विवेचितम् ।
स्मृत्याऽतो रजताभास उपपन्नो भविष्यति ॥
प्र. प. ५०-५३

# BIBLIOGRAPHY & ABBREVIATIONS

ऋजुविमला (=ऋजु)
एस्.के. रामनाथशास्त्री
मद्रास्, १९३४.

तन्त्ररहस्यम् (=त.र.)
के.एस्. रामस्वामिशास्त्री
बरोडा, १९५६.

नयविवेकः (=न.वि.)
एस्.के. रामनाथशास्त्री
मद्रास्, १९३७.

प्रकरणपञ्चिका (=प्र.प.)
ए.सुब्रह्मण्यशास्त्री
काशी, १९६१.

प्रभाकरविजयः (=प्र.वि.)
अनन्तकृष्णशास्त्री
कलकत्ता, १९११.

बृहती (=बृह)
एस्.के. रामनाथशास्त्री
मद्रास्, १९३४.

विभ्रमविवेकः (=वि.वि.)
एस्. कुप्पुस्वामिशास्त्री
मद्रास्, १९३२

शास्त्रदीपिका (=शा.दी.)
धर्मदत्तसूरिः, मुम्बई
१९२५

# 4 दिङ्नागोक्तहेत्वाभासविमर्शः*

हेतुर्लिङ्गमपदेशः साधनमित्यनर्थान्तरम् । हिनोति गमयति बलात् अप्रत्यक्षमर्थं साध्यरूपमिति हेतुः ।[1]

"उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः" [१-१-३४]

"तथा वैधर्म्यात्"[१-१-३५]

इति हि गौतमसूत्रे। अभाषि तावद्वात्स्यायनेनाप्यत्रैवम्-

"उदाहरणेन सामान्यात्साध्यस्य धर्मस्य साधनं प्रज्ञापनं हेतुः । साध्ये प्रतिसन्धाय धर्ममुदाहरणे च प्रतिसन्धाय तस्य साधनतावचनं हेतुः । उत्पत्तिधर्मकत्वात् इति । उत्पत्तिधर्मकमनित्यं दृष्टमिति"।

उदाहरणवैधर्म्याच्च साध्यसाधनं हेतुः । कथम् ? अनित्यः शब्दः उत्पत्तिधर्मकत्वात्, अनुत्पत्तिधर्मकं नित्यं दृष्टमात्मादय इति"

---

*शोधपत्रमिदं अखिलभारतीयप्राच्यविद्यासम्मेलनस्य (AIOC) अष्टाविंशेऽधिवेशने धार्वारनगरस्य कर्णाटकविश्वविद्यालये समयोजितायां पण्डितपरिषदि १२-११-७६ दिनाङ्के पठितम्।

इति ।[2] हेतुरयं साध्योदाहरणाभ्यां प्रतिसंहितः । किं नामेदमत्र प्रतिसन्धानम्? साध्ये व्यापकत्वमुदाहरणे च सम्भव इति वार्तिककारः भारद्वाजोद्योतकरः सप्तमशतकवासी।[3] उदाह्रियतेऽस्मिन् साध्यसाधनयोः अविनाभावः इत्युदाहरणं दृष्टान्तः। एवञ्च उदाहरणसाधर्म्यात् तथा उदाहरणवैधर्म्याच्च साध्यसाधकं लिङ्गमिति पर्यवसन्नम्। अत एव प्रमाणमञ्जरीकारस्योक्तिः अन्वर्था यत् -

**"लिङ्गं पुनः साध्याव्यभिचारित्वे सति पक्षधर्मतावत्"** इति। [4]

तच्चेदं लिङ्गं अन्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकिभेदेन त्रिविधम्। लिङ्गस्य बलमत्र पञ्चरूपोपपन्नत्वं विवक्षितम्। तानि च पञ्च रूपाणि पक्षधर्मत्वं, सपक्षे सत्त्वं, विपक्षात् व्यावृत्तिः, अबाधितविषयत्त्वं, असत्प्रतिपक्षत्वं चेति। असूचि चैवं दशमशतकवासिना न्यायमञ्जरीकारेण जयन्तभट्टेनापि।[5] स्वार्थपरार्थभेदेन लिङ्गस्य द्वैविध्यमुपपाद्य, द्विविधस्यापि लिङ्गस्याङ्गानि पञ्चैव प्रतिपादितानि दशमशतकवासिना शिवादित्येन सप्तपदार्थ्याम्। यथा-

**"उभयाङ्गानि पक्षधर्मत्वं, सपक्षे सत्त्वं, विपक्षात्व्यावृत्तिः अबाधितविषयत्वं, असत्प्रतिपक्षत्वं चेति" इति।[6] एवमेव तर्कामृतेऽपि तर्कालङ्कारोपाधिधारिणा जगदीशेन सप्तदशशतकवासिना हेतावश्यं पञ्चरूपोपपन्नता अपेक्षणीयेति प्रत्यपादि ।[7]**

तदनन्तरकालिकः तर्ककौमुदीकारः सप्तदशशतकवासी लौगाक्षि भास्करः स्पष्टीचकार विषयमेनमेवम्। यथा-

**"त्रयाणां मध्ये योऽन्वयव्यतिरेकी, स पञ्चरूपोपपन्न एव स्वसाध्यं, अबाधितविषयत्वं, असत्प्रतिपक्षत्वं चेति" इति ।[8]**

पक्षधर्मत्वं हि पक्षताश्रयवृत्तित्वम्। निश्चितसाध्यवति सपक्षे सत्त्वं, विद्यमानत्वं सपक्षसत्त्वम् । निश्चिसाध्याभाववति विपक्षे अविद्यमानत्वं विपक्षादव्यावृत्तिः । अबाधितविषयता च प्रत्यक्षादिना अप्रमितसाध्याभावकत्वं। असत्प्रतिपक्षता च साध्याभावसाधकहेत्वन्तरराहित्यम् । एतानि च पञ्चरूपाणि "पर्वतो वह्निमान् धूमात्" इत्याद्यन्वयव्यतिरेकिहेतावेव सम्भवन्ति । केवलान्वयिनि विपक्षादव्यावृत्तिरित्येतत् न सम्भवति । तत्र विपक्षस्यैवाप्रसिद्धेः । तथैव केवलव्यतिरेकिणि सपक्षे सत्त्वं न शक्यवचनम्। तत्र सपक्षस्यैव अप्रसिद्धेः।

उक्तपूर्वग्रन्थसन्दर्भसंवादेनेदं तत्त्वमत्रावधार्यते यत् पक्षसत्त्व-सपक्ष सत्त्व- विपक्षासत्त्व-अबाधितत्व - असत्प्रतिपक्षत्वरूप पञ्चरूपोपपन्नत्वं सद्धेतोः अन्वयव्यतिरेकिणः लक्षणमिति; विपक्षासत्त्ववर्जं रूपचतुष्टयं केवलान्वयिनः, सपक्षसत्त्ववर्जं रूपचतुष्टयं केवलव्यतिरेकिणश्च लक्षणे इति।[9] उद्दिष्टेषु रूपेषु यस्य कस्यचन एकस्य लोपेऽपि नायं सद्धेतुव्यपदेशमर्हति। न च प्रभविष्णुः साध्यसाधने। किन्तु साध्यसाधनविकलः असद्धेतुरिति निगद्यते। कणादेनायमेवानपदेशपदेन स्पष्टयकारि[10]। अस्यैवासद्धेतोः हेत्वाभासशब्दः नामान्तरम्।

अथ कोऽसौ हेत्वाभासः? आभासत इत्याभासः। भ्रमो ह्याभास इत्युच्यते। परार्थानुमाने 'सोऽयं परमो न्याय' इति वात्स्यायनादिभिः प्रस्तुते[11] पञ्चावयववाक्ये विलसन्त्यवयवाः पञ्च प्रतिज्ञा - हेतु - उदाहरण - उपनय-निगमनभेदभिन्नाः। तत्सादृश्यप्रकारकभ्रमविषयाः प्रतिज्ञाभास - हेत्वाभास - उदाहरणाभास - उपनयाभास - निगमनाभासाः दार्शनिकैस्तत्र तत्र स्वीयनिबन्धेषु सविभागं समुपदर्शिताः[12]। यद्यपि हेत्वाभासः पञ्चस्वेतेषु द्वितीयः; अथापि जागर्ति तावदस्याद्वितीयं स्थानमितरापेक्षया। तन्मूलकत्वादनुमानप्रमाणस्य। अतस्सत्यपीतरेषां विचारे तत्त्वनिर्णयविजयप्रयोजकतया प्रादर्शि दार्शनिकैरतितरां आदरो हेत्वाभासनिरूपणे। तच्च निरूपणं प्रतिदर्शनं विविधेष्वंशेषु भिद्यमानं दरीदृश्यते।

## हेत्वाभासशब्दार्थः

हेत्वाभासपदमिदं द्विधा व्युत्पादितं शास्त्रकारैः। अहेतवः हेतुवदाभासन्त इति हेत्वाभासाः, दुष्टहेतव इति प्रथमः कल्पः। लक्षणैकदेशयोगादपि हेतुवदाभासनमहेतोरप्युपपद्यते[13]। सकललक्षणापायेऽपि पञ्चमीनिर्देशादिः भ्रमनिमित्तमित्यपि वदन्ति केचित्।

हेतोराभासाः हेत्वाभासाः हेतुगता दोषविशेषा इति द्वितीयः कल्पः। प्रथमकल्पे वतप्रत्ययस्य "तेन तुल्यं क्रिया चेद्वतिः" [अष्टध्यायी - ५-१-११५] इति सादृश्यमर्थः। आङ्पूर्वकभासधातोः आभास इत्यर्थः। आभासो हि भ्रम इति प्रागवोचाम। हेतुपदं सद्धेतुपरम्। सद्धेतुसादृश्यप्रकारभ्रमविषयः हेत्वाभास इत्यर्थलाभः। द्वितीयकल्पे हेतोः आभासा इत्यत्र षष्ठ्या कृत्प्रत्ययार्थश्च विषयतावान् निष्ठत्वमर्थः। आभासाः देषाः। हेतुनिष्ठा दोषविशेषा हेत्वाभासाः हेतुगता दोषविशेषाः। तादृशदोषवत्त्वं दुष्टहेतुत्वमिति सारः। विषयाश्चेमे आभिः पङ्क्तिकाभिः सुखबोधाः।

| | | | |
|---|---|---|---|
| 1. | 1. पक्षधर्मत्वे | आश्रयासिद्धः | असिद्धः |
| | | स्वरूपासिद्धः | प्रतिबन्धकः |
| | 2. सपक्षसत्त्वे | असाधारणः | सव्याभिचारः - |
| | | अनुपसंहारी | प्रतिबन्धकः |
| | 3. विपक्षासत्त्वे | व्याप्यत्वासिद्धः | प्रतिबन्धकः |
| | | विरूद्धः | ,, |
| | | साधारणः | ,, |
| | 4. अबाधितविषयत्वे | बाधः | ,, |
| | 5. असत्प्रतिपक्षत्वे | सत्प्रतिपक्षः | ,, |

---

| | | |
|---|---|---|
| 2. | 1. सपक्षसत्त्वम् | ,, |
| | 2. पक्षसत्त्वम् | ,, |
| | 3. विपक्षासत्त्वम् | अन्वयव्यतिरेकिणः |
| | 4. अबाधितत्त्वम् | ,, |
| | 5. असत्प्रतिपक्षत्वम् | ,, |

---

| | | |
|---|---|---|
| 3. केवलव्यतिरेकिणः | असाधारणः | च न भवतः |
| न सपक्षः | अनुपसंहारी | |
| 4. केवलान्वयिनः | व्याप्यत्वासिद्धः | |
| न विपक्षः | विरुद्धः | च न भवन्ति |
| | साधारणः | |

इत्थंभूते वस्तुनि न्यायप्रवेशकसूत्राभिधे बौद्धन्यायग्रन्थे दिङ्नागेन हेतोस्त्रैरूप्यमेवं प्रत्यपादि । यथा - "हेतुस्त्रिरूपः । किं पुनस्त्रैरूप्यम्? पक्षधर्मत्वं, सपक्षे सत्त्वं, विपक्षे च असत्त्वमिति" [11] । तदसत्। अबाधितत्त्वासत्प्रतिपक्षत्वयोरप्यनपलपनीयत्वात् । उक्तपूर्वेषु न कुत्रापि तयोरन्तर्भावस्य वक्तुं शक्यत्वात्। तदनुरोधं तेन त्रय एव हेत्वाभासाः निरूपिताः

-"असिद्धानैकान्तिकविरुद्धा हेत्वाभासाः" इति[15]। नायं दिङ्नागाभिमतः पक्षः साधीयान्। न्यूनतादोषदुष्टः। असिद्धादीनां हेत्वाभासानां अनुमितिकरणव्याप्तिग्रह प्रतिबन्धकतामात्रविश्रान्तत्वात्। साक्षात् साध्यवत्ताग्रहप्रतिबन्धकताविरहात्। अनुमितिं प्रति प्रतिबन्धकतया न कस्यापि हेत्वाभासस्य तेन प्रतिपादितत्वात्। बाधस्य तु साध्यवत्ताग्रहप्रतिबन्धः परमं प्रयोजनम्।

## बाधः

### १. "ह्रदो वह्निमान्, प्रमेयत्वात्"

इत्यादिबाधस्थले यद्यपि हेतोः साध्याभाववद्वृत्तितया व्यभिचार इति दुष्टत्वमुपपद्यते। एवं

### २. "ह्रदो वह्निमान्, धूमात्"

इत्यादिबाधस्थले पक्षे हेतोरभावात् स्वरूपासिद्धिरिति तत एव हेतोः दुष्टत्वमुपपद्यते। साध्याभाववत्पक्षः बाधः। तादृशपक्षे हेतुसत्त्वे व्यभिचारः दोषः। हेतोरसत्त्वे स्वरूपसिद्धिः दोषः। बाधस्थले च व्यभिचारो वा स्वरूपासिद्धिर्वा अवश्यं भवत एव। एवं च तर्हि उक्त व्यभिचार - स्वरूपासिद्धयोः अवश्यं बाधस्थले विद्यमानतया लाघवात् तयोस्तदन्तर्भावः शङ्क्येत। तथापि -

### ३. "पृथिवी गन्धवती, स्नेहात्"

इत्यादौ बाधाभावेऽपि व्यभिचार - स्वरूपासिद्धयोः दर्शनात्। व्यभिचार - स्वरूपासिद्धयोरनङ्गीकारे बाधेन तत्र हेतोः दुष्टत्वोपपादनस्य दुष्करत्वात्। अतः व्यभिचारः स्वरूपासिद्धिश्च अङ्गीकार्यौ। मास्तु बाधः इति चेत् न। बाधस्येदं विशिष्टप्रयोजनं यत् साध्यवत्ताग्रहप्रतिबन्धः। हेतौ "अयं बाधितः" इति विशेषतो व्यवहारश्च। व्यभिचारस्य व्याप्तिग्रहप्रतिबन्धः "अयं व्यभिचारी" इति विशेषतो व्याहारश्च प्रयोजनम्। स्वरूपासिद्धेस्तु हेतुमत्ताज्ञानप्रतिबन्धः "अयं स्वरूपासिद्धः" इति विशेषतो व्यवहारश्च प्रयोजनम्।

दुष्ट इति सामान्यतो व्यवहारस्तु सर्वेषां दोषाणां साधारणं प्रयोजनम्। एवञ्च साध्यवत्ताज्ञानप्रतिबन्धरूपविशेषप्रयोजनद्वारा "अयं बाधित" इति व्यवहारनिर्वाहः बाधेनैव भवति।

अन्यच्च - व्यभिचारज्ञानं हि परामर्शप्रतिबन्धद्वारैव अनुमितिं प्रतिबध्नाति न साक्षात्। यत्र परामर्शानन्तरं बाधोन्मेषात् अनुमित्यनुत्पादफलत्वा-

भावेन तत्रानुमित्यापत्तिः । बाधज्ञानमन्तरा न तत्र हेतोः दुष्टत्वव्यवहारः । अतः बाधज्ञानस्य अनुमितिप्रतिबन्धकत्वं तद्विषयबाधरूपेण दोषेणैव हेतोः दुष्टत्वव्यवहारश्चावश्यमवसेयः । व्यभिचारस्वरूपासिद्धयोः अकिञ्चित्करत्वात्, बाधेनैव अनुमित्यनुत्पादस्य अनुभवसिद्धत्वात् । व्यभिचार स्वरूपासिद्धिरहितं बाधस्थलं च वर्तते ।

## ४. "उत्पत्तिक्षणावच्छिन्नघटो गन्धवान्, पृथिवीत्वात्."

इत्यत्र हेतोः पृथिवीत्वस्य साध्यव्यापकीभूताभावप्रतियोगित्वाभावात् न चापि विरोधः न तरां सत्प्रतिपक्षः प्रतियोगिव्यधिकरणगन्धाभावव्याप्यस्य घटेऽ संभवात् । अन्यथाऽ स्यापि सत्प्रतिपक्षसङ्कीर्णत्वे बाधव्याप्यत्वं सत्प्रतिपक्षस्य दुर्निरूपम् । व्यापको हि व्याप्यापेक्षया अधिकदेशवृत्तिरिति सार्वजनीनोऽ नुभवः । अतः तद्विलक्षणतया बाधसिद्धिः ।

न चात्रोत्पत्तिक्षणावच्छेदेन गन्धाभाववति घटे पृथिवीत्वस्य सत्त्वादस्ति व्यभिचार इति वाच्यम् । व्यभिचारघटकसाध्याभावस्य प्रतियोगिवैयधिकरण्येन विशेषणीयत्वात् । अन्यथा "कपिसंयोगी, एतद्वृक्षत्वात्" इति सद्धेतोरपि व्यभिचारित्वापत्तिः दुर्वारा । गन्धाभाववदुप्तत्तिक्षणावच्छिन्नघटो हि बाधः । अत्र चायमेक एव दोषः । उक्तञ्चैतदुदयनाचार्येण परिशुद्धौ यथा -

**"ननु बाधो नाम नाविनाभावभङ्गादपरः कश्चित् । सोऽपि न त्रैरूप्यप्रच्यवादन्य इत्यत आह - बाधेति । नहि बाधमव्यवस्थाप्य अनैकान्तिकत्वमपक्षधर्मत्वं वावतारयितुं शक्यम् । अतोऽ स्यावश्योद्भाव्यतयाऽ वश्याभ्युपगन्तव्यः । अन्यथा विरोधमपि नाभ्युपगच्छेत् । विरोधे हि हेतोरभावे स्वरूपासिद्धिः साध्याभावेऽ पक्षधर्मता दुर्निवारा"** इति [16] ।

अतः बाधस्यातिरिक्तहेत्वाभासत्वमवश्याभ्युपगन्तव्यम् ।

## सत्प्रतिपक्षः

एवमेव सत्प्रतिपक्षोऽपि पूर्वोक्तहेत्वाभासविलक्षणः । न च तस्य विरोधेऽ न्तर्भावोऽ स्त्विति वाच्यम् । विरोधो हि साध्यव्यापकीभूताभावप्रतियोगिहेतुत्वम् । अर्थात् साध्याभावनिरूपितव्यतिरेकव्याप्तिविशिष्टहेतुः विरुद्धः । साध्याभावव्याप्तिविशिष्टहेतुमत्पक्षश्च सत्प्रतिपक्षः । अतस्तयोर्जागर्ति

तावत् सुमहान् भेद इति न सत्प्रतिपक्षस्य विरोधेऽन्तर्भावः । विरोधस्य साध्याभावनिरूपितव्याप्तिप्रकारकहेतुविशेष्यकज्ञानरूपतया साध्याभावग्रहसामग्रीत्वेनास्य प्रतिबन्धकता।

सत्प्रतिपक्षे च हेतुद्वयम्। तत्र प्रतिहेतुरेव साध्याभावसाधकः, विरुद्धे पुनः एक एव हेतुः। स च साध्याभावसाधक एव साध्यासाधकत्वेन उपन्यस्यत इति पुरुषनिष्ठाशक्तिविशेषदोषज्ञापकत्वं तत्र ज्ञापयति। सत्प्रतिपक्षे तु न तथेति दोषविशेषज्ञापकत्वाज्ञापकत्वाभ्यां द्वयोस्तयोः भेद इति ज्ञेयम्।

एवं च फलभेदादपि विरुद्धसत्प्रतिपक्षयोर्भेदः शक्यवचनः । तथाहि - सत्प्रतिपक्षः साध्यतदभावोभयानुमितिप्रतिबन्धफलकः । विरुद्धस्तु एकानुमितिप्रतिबन्धफलक इति फलभेदनिबन्धनोऽपि समुल्लसति तयोर्भेदः । अत एव सत्प्रतिपक्षस्य अनुमितिप्रतिबन्धकत्वं न दूषकताबीजम्, तदभावव्याप्यावत्ताज्ञानस्यानुमितिप्रतिबन्धकत्वे मानाभावादिति संशयजनकत्वं तस्य दूषकताबीजमित्युपन्यस्यतां रत्नकोशकाराणां मतं दूषयन् विश्वनाथन्याय - पञ्चाननः सत्प्रतिपक्षस्य परस्परानुमितिप्रतिबन्धः फलमित्यभिधत्ते। यथा -

**"अत्र च परस्पराभावव्याप्यवत्ताज्ञानात् परस्परानुमितिप्रतिबन्धः फलम्" इति।** [17]

तत्त्वचिन्तामणौ गङ्गेशोपाध्यायेन सत्प्रतिपक्षग्रन्थे निर्णयाजनकत्वं फलमित्यभ्यधायि। यथा -

**"दूषकताबीजं तु समबलविरोधिसामग्रीप्रतिबन्धेन निर्णयाजनकत्वम्। न तु व्याप्तिपक्षधर्मताविरह एव। सद्धेतावपि सत्प्रतिपक्षवत्वात्"**इति [18]

एवञ्चास्य अनुमित्युत्पादकत्वं दूषकताबीजमिति फलितम्।

एवञ्च हेत्वाभासानां पञ्चविधत्वं न्यायदर्शने गौतमोक्तं तदनन्तरकालिकैः नैयायिकैः सम्यगास्थितं साधु सङ्गच्छते। यथा - "सव्यभिचारविरुद्ध - प्रकरणसम - साध्यसम - कालातीता हेत्वाभासाः" [1-2-4] इति।[19] वैशेषिकदर्शनेऽपि कणादेन कण्ठरवेणोक्ता असिद्ध - विरुद्ध - अनैकान्तिकास्त्रयः चकारेण सङ्गृहीतौ बाधितसत्प्रतिपक्षिताविति आहत्य पञ्च हेत्वाभासाः। यथा-

**"अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः" [31-15]**

इति ।[20]

अत्र अनपदेश इति हेत्वाभासवाची शब्दः। हेतुर्हि तैः अपदेश इत्युच्यते ॥

यद्यपि पदार्थसङ्ग्रहकारः प्रशस्तपादः-

**अनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते।**
**तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥**
**विपरीतमतो यत्स्यात् एकेन द्वितयेन वा।**
**विरुद्धासिद्धसन्दिग्धं अलिङ्गं काश्यपोऽब्रवीत् ॥"**

इत्याद्युक्त्वा[21] पूर्वोक्तत्रितयविलक्षणतया अनध्यवसितनामानं हेत्वाभासमङ्गीकरोति यो वा वस्तुतः असाधारणाख्यानैकान्तिक एव अन्तर्भावमर्हति। विशेषस्त्वग्रे वक्ष्यते। अत एवोक्तं शङ्करमिश्रेणापि स्वोपस्कारे - "वृत्तिकारस्तु अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः" इति सूत्रस्थचकारस्य बाधसत्प्रतिपक्षसमुच्चयार्थतामाह। तेन 'सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकालाः पञ्च हेत्वाभासाः' इति गौतमीयमेव मतमनुधावति" इति [22]। एवं'विरुद्धासिद्धसन्दिग्धं अलिङ्गं काश्यपोऽब्रवीत्' इत्यादिवचनमपि उपलक्षणविधयैव पञ्चहेत्वाभासान् प्रतिपादयति[23]।

प्रकृते न्यायप्रवेशकसूत्रे असिद्धादिषु हेत्वाभासेषु दिङ्नागकृतः अवान्तरविभागोऽपि न युक्तिसह इति संक्षेपेण प्रदर्श्यते।

## असिद्धः

दिङ्नागेन प्रथमतः निर्दिष्टो हेत्वाभासः असिद्धः। स च उभयासिद्ध - अन्यतरासिद्ध - सन्दिग्धासिद्ध - आश्रयासिद्ध - भेदेन चतुर्धा तेन विभक्तः। नैयायिकमतानुरोधमसिद्धः आश्रयासिद्ध - स्वरूपासिद्ध - व्याप्यत्वासिद्धभेदेन त्रिविध एव।

दिङ्नागेन चतुर्थासिद्धभेदतयोपन्यस्तः आश्रयासिद्धः नैयायिकोक्ताश्रयासिद्धसमानयोगक्षेमः। उभयत्राप्याश्रयासिद्धत्वात्। तथैव -

"शब्दः अनित्यः, चाक्षुषत्वात्" इति य उभयासिद्ध उपन्यस्तः सः स्वरूपासिद्ध एव। उभयोरपि दोषसामान्यात्।

यः तृतीयः - शब्दः अनित्यः, कृतकत्वात् इति अन्यतरासिद्धतयोपन्यस्तः सः हेत्वाभास एव न भवति। अन्यच्च मीमांसकं कापिलं वा प्रति असिद्ध इत्ययमन्यतरासिद्ध इति वचनं न घटते। कुत इति चेत् - दार्शनिकेषु बहवः सिद्धान्तभेदाः भवन्ति। परप्रयुक्ते हेतौ अन्यः अवश्यं हेत्वाभासोद्घाटनं करोति स्वपक्षरक्षणार्थम्। अतः अयं अन्यतरासिद्ध इति विभाग एव न क्षोदक्षमः।

एवं संदिग्धासिद्धोऽपि। 'वह्निमान्, धूमात्' इत्यादौ बाष्पभावेन वा रेणुरूपतया वा सन्दिह्यमानः हेतुः। परेण सन्दिह्यमानत्वं न हेत्वाभासतायां गमकमिति नायं हेत्वाभास इत्यङ्गीक्रियते। अयं जैननैयायिकेन यशोविजयगणिनापि नाङ्गीकृतः।

अत्रासिद्धविभागे नैयायिकाभ्युपगतव्याप्यत्वासिद्धरूपहेत्वाभासः न दिङ्नागेनाङ्गीकृत इति न्यूनता चास्मिन् पक्षे।

## अनैकान्तिकः

अयं साधारणः असाधारणः सपक्षैकदेशवृत्तिर्विपक्षव्यापी - विपक्षैकदेशवृत्तिस्स पक्षव्यापी उभयपक्षैकदेशवृत्तिः विरुद्धाव्यभिचारी चेति षोढा विभक्तः।

अत्र साधारणासाधारणयोर्विषये न नैयायिकानां विप्रतिपत्तिः। किन्तु तदभिन्नानां चतुर्णां विषय एव। तथाहि -

१. साधारणः - "शब्दः नित्यः, प्रमेयत्वात्"

२. असाधारणः - "शब्दः नित्यः, श्रावणत्वात्"
इत्यनयोः नैयायिकोक्तदिशैव हेत्वाभासता सुलभा।

३. सपक्षैकदेशवृत्तिर्विपक्षव्यापी -
"अप्रयत्ननान्तरीयकः शब्दः, अनित्यत्वात्"

४. विपक्षैकदेशवृत्तिस्सपक्षव्यापी -
"प्रयत्ननान्तरीयकः शब्दः, अनित्यत्वात्"

५. उभयपक्षैकदेशवृत्तिः - "नित्यः शब्दः, अमूर्तत्वात्"

इत्युक्तानां त्रयाणां साधारणाख्ये हेत्वाभासेऽन्तर्भावः। "विपक्षवृत्तित्वं साधारणत्वमिति" हि साधारणलक्षणं गङ्गेशोपाध्यायेन प्रतिपादितम्। एषु च विपक्षवृत्तित्वं सर्वत्र सुलभमिति तत्रैवान्तर्भावः।

६. विरुद्धव्यभिचारी -
"अनित्यः शब्दः कृतकत्वात्, घटवत्"
"नित्यः शब्दः, श्रावणत्वात्, शब्दत्ववत्"

इति षष्ठः अनैकान्तिकप्रभेद इति दिङ्नागाशयः । अयं च नैयायिकोक्तसत्प्रतिपक्ष एवेति नायमत्रानैकान्तिके पातमर्हति । अयं बौद्धनैयायिकेनैव धर्मकीर्तिना न्यायबिन्दौ दूषितः । [24]

## विरुद्धः

अयं पुनः धर्मस्वरूपविपरीतसाधनः, धर्मविशेषविपरीतसाधनः, धर्मिस्वरूप विपरीतसाधनः, धर्मिविशेषविपरीतसाधनश्चेति चतुर्धा विभक्तः दिङ्नागेन।

१. अत्र "नित्यः शब्दः, कृतकत्वात्" इति धर्मस्वरूपविपरीतसाधनः प्रथमः विरुद्धः । अत्र धर्मस्वरूपस्य नियत्वस्य विपरीतं अनित्य त्वमेव कृतकत्वरूपहेतुना साध्यत इत्ययं तैधर्मस्वरूप विपरीत साधन इत्युक्तम् । अयं साध्याभाव व्याप्तः हेतुः विरुद्ध इति नैयायिकैरप्यभ्युपगतः ।

२. धर्मविशेषविपरीतसाधनः- "परार्थाश्चक्षुरादयः संघातत्वात्, शयनास नाद्यङ्गविशेषवत्"।

३. धर्मिस्वरूपविपरीतसाधनः - "न द्रव्यं न कर्म न गुणः भावः, एकद्रव्यत्वात्, गुणकर्मसु च भावात्, सामान्यविशेषवदिति" ।

४. धर्मिविशेषविपरीतसाधनः- न द्रव्यं न कर्म, न गुणः भावः, एकद्रव्य त्वात्, गुणकर्मसु च भावात्" ।

[अत्र धर्मिणः भावस्य विशेषः सत्प्रत्ययकर्तृत्वं तद्विपरीतमसत्प्रत्यय कर्तृत्वं साधयति हेतुः]

अल्पभेदनिबन्धनाः बहवोऽत्रैवंरूपाः विरुद्धाः भवितुमर्हन्ति। तेषां सर्वेषां परिगणनं न शक्यवचनमिति नैयायिकैः उदासितम्।

अत एव प्रतिज्ञाविरोध - हेतुविरोधभेदेन द्विधा भिन्नोऽपि विरोधः, अष्टविधोऽपि स्वरूपासिद्धः, त्रिविधो व्याप्यत्वासिद्धः, दशविधो बाधः, दशविधोऽपि सत्प्रतिपक्षः लाघवानुरोधं न विभक्ताः ॥ [25]

न्यायवार्तिककारस्य भारद्वाजोद्योतकरस्य कथनानुरोधं सर्वे च हेत्वाभासाः आहत्य ३६०० भवन्ति। [26] यथोक्तं न्यायवार्तिके -

"कियता पुनर्भेदेनायं हेतु - हेत्वाभासः प्रसृत इति? काल - पुरुष - वस्तु - भेदानुविधानेन अपरिसंख्येयः" इति। [26]

अत एव न्यायग्रन्थेषु गौतममारभ्याद्यावधि प्रधानाः हेत्वाभासाः पञ्चधा विभक्ताः लक्ष्यन्ते । न च मध्ये कैश्चिदन्ये च हेत्वाभासाः समुपदर्शिता इति वाच्यम् । भदन्तदर्शनप्रभावमूलकोऽयं विभाग इति न सुधीभिरादर्तव्यः ।

इत्थंभूते वस्तुनि दिङ्नागेन सत्प्रतिपक्षबाधयोः अनङ्गीकरणं न्यूनताव हम् ।[27]

तथा त्रिविधस्य असिद्धस्य चतुर्धा, त्रिविधस्य सव्यभिचारस्य षोढा, विरोधस्य चतुर्धा च कृतः अवान्तरविभागः अधिकतादोषदुष्ट इति गौतमोक्तः पञ्चधा विभाग एव साधीयानिति विस्तरभीत्या विरम्यते।

NOTES :

1 जिनवर्धनी - पृ ३९

2 न्यायभाष्यम् - न्यायचतुर्ग्रन्थिका. पृ. ५२६

3 न्यायवार्तिकम् - न्या. च. पृ. ५२७

4 प्रमाणमञ्जरी पृ. ९

5. न्यायमञ्जरी पृ. १३४

6. सप्तपदार्थी vol. II पृ. ३२

7. तर्कामृतम् पृ. १७.

8 तर्ककौमुदी पृ ११.

9. तर्कामृतम् पृ. १८.

10. वैशेषिकदर्शनम् पृ. ९५.

11 न्यायभाष्यम् पृ. ४.

12. न्यायपरिशुद्धि पृ १३०.

13. न्या म - पृ. २५२

14. न्यायप्रवेशकसूत्रम् - पृ. १.

15. न्यायप्र सू - पृ. ३.

16. न्यायचतुर्ग्रन्थिका - परिशुद्धिः पृ. ६६८.

17. कारिकावली - पृ. ५२२.

18. सत्प्रतिपक्षा· पृ. १.

19. न्यायदर्शनम् न्याय. च. पृ.६३१.

20. वैशेषिकदर्शनम् - पृ. ९५.

21. वैशेषिकदर्शनम् पृ. ९९.

22. वै. सूत्रोपस्कारः पृ. ९९.

23. वै. द. प्र. भा. पृ. ११६.

24. न्यायबिन्दु· - पृ. ८६.

25. न्यायवार्तिकम् - पृ. ६४८.

26. सत्प्रतिपक्षः - भू. पृ. २.

27. न्यायवार्त्तिकम् - पृ. ६३१.

# BIBLIOGRAPHY & ABBREVIATIONS


उदयनाचार्यः
परिशुद्धिः (=परि)
दरभङ्गा, (1967).

कणादः
वैशेषिकदर्शनम् (=वै.द.)
वाराणसी, 1923.

गङ्गेशोपाध्यायः
सत्प्रतिपक्ष (=सत्.)
वाराणसी, 1962.

गङ्गेशोपाध्याय
साधारणग्रन्थः (=साधा)
वाराणसी, 1927.

गौतमः
न्यायदर्शनम् (=न्या.द )
दरभङ्गा, 1967.

चिदानन्दपण्डितः
नीतितत्त्वाविर्भाव (=नीति.)
मद्रास्, 1967.

जगदीशः
तर्कामृतम् (=तर्का.)
कलकत्ता, 1880.

जयन्तभट्टः
न्यायमञ्जरी (=न्या.म.)
वाराणसी, 1934

जिनवर्धनः
जिनवर्धनी (=जि.व.)
अहम्मदाबाद् 1963.

दिङ्नागः
न्यायप्रवेशकसूत्रम् (=न्या.प्र.सू.)

बरोडा, 1968.

धर्मकीर्ति।
न्यायबिन्दु· (=न्या.बि )
वाराणसी, 1954.

भरद्वाजोद्योतकर·
न्यायवार्तिकम् (=न्या.वा.)
दरभङ्गा, 1967.

लौगाक्षिभास्कर.
तर्ककौमुदी (=त.कौ )
मुम्बई, 1928.

वात्स्यायन·
न्यायभाष्यम् (=न्या.भा.)
दरभङ्गा, 1967.

विश्वनाथन्यायपञ्चानन·
कारिकावली (=कारि.)
मद्रास्, 1923.

वेदान्तदेशिकः
न्यायपरिशुद्धि (=न्या.प.)
काञ्चीपुरम्, 1940.

शङ्करमिश्रः
वैशेषिकसूत्रोपस्कारः (=वै.सू.उ.)
वाराणसी, 1923.

शिवादित्य·
सप्तपदार्थी (=सप्त.)
अहम्मदाबाद्, 1963.

सर्वदेवसूरि·
प्रमाणमञ्जरी (=प्र.म.)
मुम्बई, 1937.

# 5 पातञ्जलयोगदर्शनम्
# मतभेदः

मोदः प्रमोद आनन्दः । इदं हि तावदपरोक्षं प्रेक्षावतां यत् पातञ्जलस्य योगदर्शनस्य जागर्ति विलक्षणं स्थानं सर्वेष्वपि दर्शनेष्विति। तत्त्वज्ञानसाधनभूतस्य शास्त्रस्य हि दर्शनशब्दव्यपदेशः । दर्शनानि खल्वास्तिकनास्तिकभेदेन द्विधा भिद्यन्ते। तत्रास्तिकदर्शनानि षडिति विद्वत्तल्लजानां विनिश्चय एवम् -

"द्वौ योगौ द्वे च मीमांसे द्वौ तर्काविति षड् बुधाः

शास्त्राण्याहु"रिति।

सांख्यदर्शनम्-योगदर्शनम्-पूर्वमीमांसादर्शनम्-उत्तरमीमांसा दर्शनम् अथवा वेदान्तदर्शनम् - न्यायदर्शनम्- वैशेषिकदर्शनमिति षोढा प्रसिद्धानीमान्यास्तिक दर्शनानि । तत्र प्रतिपाद्यवस्तुमहिम्ना अद्वितीयमिदं योगदर्शनं सर्वप्रथमं स्थानमाक्रम्य समुल्लसतीति तावद्विदितचरमेव विमर्शरसिकानाम्।

पतञ्जलिर्भगवानस्य दर्शनस्य व्यवस्थापक इति निश्चप्रचं वचः पण्डितसमाजेषु । यश्च महर्षिः पाणिनिप्रणीताया अष्टाध्याय्याः महाभाष्यमिति सुप्रसिद्धं भाष्यमाबभाषे, तेन च "महाभाष्यकार" इति महतीं प्रतिष्ठामविन्दत स एवायं पतञ्जलियोगदर्शनप्रणेतेत्यत्र विप्रतिपद्यन्ते वादिनः । अथापि जगत्प्रसिद्धः श्लोकोऽसौ पतञ्जलेर्भगवतः योग-व्याकरण-वैद्यकग्रन्थप्रणेतृतां सुष्ठु व्यवस्थापयतीति एकव्यक्तिनिबन्धनतामेव त्रयाणामातिष्ठन्ते सम्प्रदायविदः।

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन।**
**यो-पाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतो-स्मि ॥**

इति पतञ्जलिप्रार्थनपरोऽयं श्लोकः भोजकृत इत्यवगच्छामः।काश्मीरदेशे तपश्चरतः कस्यचिन्महर्षेरञ्जलावपतदयमिति पतञ्जलिनाम्नाऽस्य प्रसिद्धिर्जाता । कथयन्ति वृद्धाः काश्मीरस्यैव गोनर्ददेश इत्यस्ति महती प्रसिद्धिः । अत एवायं

गोनर्दीय इति व्यपदिश्यते। गोणिकापुत्र इत्यप्यसौ बहुशो व्यपादिश्यत इति।

महाभाष्ये "पुष्यमित्रं यजामहे, चन्द्रगुप्तसभेति" प्रयोगदर्शनात् अयं पाटलिपुत्रवासीति केचित्कथयन्ति। अन्ये तु "काश्मीरान् गमिष्यामो देवदत्त ! तत्र सक्तून् पास्यामः। अभिजानासि देवदत्त! यत् काश्मीरेषु वत्स्यामः" इति महाभाष्यवचनादयं काश्मीरवासीति वदन्ति। "काश्मीरान् गमिष्याम" इति भविष्यत्कालप्रयोगदर्शनात् पाटलिपुत्रमेवास्य निवास इति निश्चप्रचम्।

यद्यपि जाग्रति महोदयस्यास्य कालविषये बह्व्यो विप्रतिपत्तयः, तथापि क्रीस्तोः पूर्वः तृतीयशतकाब्दे तावदसौ भुवमलञ्चकारेति बहुविदां बहूनामभिप्रायः।

पतञ्जलिप्रणीतं योगदर्शनमिदं सूत्ररूपम्। प्रायोऽत्र द्विशतं सूत्राणि सन्ति। तानि च सूत्राणि चतुर्षु पादेषु विभक्तानि। पादः अध्याय इत्यनर्थान्तरम्। अस्य दर्शनस्योपरि व्यासेन भगवता प्रणीतं भाष्यं सांख्यप्रवचनभाष्यनाम्ना सुप्रसिद्धम्। यस्य च पुनः षड्दर्शिनीपारदृश्वना तत्रभवता वाचस्पतिमिश्रेण अन्वर्था तत्त्ववैशारदी व्याख्या निरमायि। योगमर्मज्ञेन विज्ञानभिक्षुणा "योगवार्तिकम्" प्रणीतम्। योगभाष्यस्योपरि शङ्करभगवत्पादैर्विवरणटीका कृता। नागेशभट्टेन वृत्तिः काचित्प्रणीता। सन्ति चान्ये योगमञ्जरी- योगचिन्तामणिः हठयोगप्रदीपिका-योगवासिष्ठाख्याः ग्रन्थाः। सत्स्वपि बहुषु व्याख्यानेषु भोजदेवविरचिता सूत्रवृत्तिः सर्वसुलभा मूलार्थावगाहिनी इति सर्वजनीनोऽनुभवः।

पातञ्जलयोगशास्त्रेऽस्मिन् समुल्लसन्ति चत्वारः पादा इति प्रागवोचाम। तत्राद्यः पादः समाधिनाम्ना प्रथितः यश्च योगपाद इत्यपि सुप्रसिद्धश्चकास्ति। साधनपादो द्वितीयः। तृतीयस्तु पादः विभूतिपादसमाख्यः। इममेव पादं सिद्धिपादमित्यपि सङ्गिरन्ते योगतत्त्वविदः। अन्तिमः कैवल्यपादः।

अथासौ सर्वप्रथमं जागर्ति विचिकित्सा कोऽसौ योगो नाम ? समुपलभ्यन्ते चात्र विषये बहूनि व्याख्यानानि। योगो नाम भावातीता स्थितिः इति केषांचिदाशयः। केवलं ध्यानमित्यन्येषामभिप्रायः। प्राप्तिः योगस्यार्थः सा च प्रकृतिबद्धस्य पुरुषस्य ईश्वरप्राप्तिरेवेति। व्यासो हि भगवान् योगं समाधिं भाषते। स च समाधिः चित्तस्य धर्मः सार्वभौमः। सा चासंप्रज्ञातावस्थेति ध्यायिनां राद्धान्तः।

पतञ्जल्लिरेव योगलक्षणमेवं सूत्रयति "योगश्चित्तवृत्तिनिरोध" इति।

चित्तवृत्तीनां प्रमाणविपर्ययादीनां निरोधः निवर्तनं योग इत्युच्यते। चित्तनिग्रहरूपः अतीन्द्रियः यत्नविशेष एव वृत्तिनिवर्तनम्। स च संप्रज्ञातासंप्रज्ञातावस्थाभेदभिन्नः द्विविधः समाधिरेव योग इति व्यासाभिप्रायः। सम्यगाधानमेव समाधिः। चित्तावस्थानमेवात्र आधानशब्दार्थः। सम्यक् संशयविपर्ययरहितत्वेन प्रज्ञायते प्रकर्षेण ध्येयस्वरूपं ज्ञायत इति संप्रज्ञातः।

ध्येयध्यानभेदाग्रहा स्थितिः असंप्रज्ञातावस्था।

सांख्ययोगयोः पृथक्त्वं नास्तीति भगवता अगायि चैवम् - 'सांख्ययोगौ पृथग्बालाः'। आलोच्यमाने वस्तुनि तत्सत्यमेव प्रतिभाति शास्त्रयोरनयोः परस्परपूरकत्वात् । अन्यथा सांख्यज्ञानं निस्साधनं कथं वोत्पत्तुमर्हति ? लक्ष्यविरहितो योगः केन वा समाश्रीयेत ? अतः सांख्ययोगयोः समिन्धे साध्यसाधनभावरूपः सम्बन्धः इति वस्तुतत्त्वम् । अत एव सांख्ययोगौ पृथक्करणायोग्याविति भगवद्वचनं साधु सङ्गच्छते। व्यवह्रियते च योगदर्शनं सेश्वरसांख्यमित्यपि।

योगदर्शनस्य साधनभूतत्वेन बहवः अंशाः सांख्यदर्शनादेव एभिः स्वीक्रियन्ते । ईश्वरः प्रकृतिः पुरुष इति त्रीणि तत्त्वानि प्रधानानि शास्त्रेऽस्मिन्। प्रकृतिवशं पुरुषं मोचयितुमेव शास्त्रमिदं प्रवर्तते । प्रकृतिबन्धाद्विनिर्मुक्तः जीवः केवलः तिष्ठतीति सैव मुक्तिरिति च अभ्यवर्णि दर्शनेऽस्मिन्।

समाधिपाद इत्याख्यातः प्रथमपाद एव दर्शनस्यास्य सारभूतः । यस्य वा विवरणमन्येषु पादेषूपलभ्यते । "अथ योगानुशासनम्" इत्युपक्रम्य योगस्वरूपं द्वितीयसूत्रे निर्दिश्य तद्विवरणमेवान्येषु सूत्रेषु प्रत्यपादि सूत्रकारेण । चित्तपरिणामविशेषाः प्रमाणविपर्ययविकल्पनिद्रास्मृतयः पञ्चतय्यः वृत्तयः भवन्तीति तासां स्वरूपं पृथक् विवृतम्।

तर्हि एतासां वृत्तीनां निरोधः कथं कर्तव्य इति शङ्का स्यादिति "अभ्यासवैराग्याभ्यां तन्निरोधः" इति निरोधमार्ग उपदिष्टः । ततः संप्रज्ञातासंप्रज्ञातसमाधिस्वरूपं सम्यक् प्रपञ्चितम् । ['क्लेशकर्मविपाकाशयैर परामृष्टः पुरुषविशेष ईश्वर' इति ईश्वरस्वरूपं सप्रपञ्चं निरदेशि प्रथमपादेऽस्मिन्।]

ततः द्वितीयपादे क्रियायोगस्वरूपं सम्यक् प्रादर्शि चैवम् - "तपस्स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः"। अयञ्च क्रियायोगः "समाधिभावनार्थः क्लेशतनूकरणार्थश्चे" ति तदनन्तरसूत्र एव विव्रियते । तदनु के च क्लेशा इति क्लेशस्वरूपं विवृतम्। पश्चात् लोके प्रसिद्धानि अष्टौ योगाङ्गानि एवं निरूपितानि - 'यम - नियम - आसन - प्राणायाम - प्रत्याहार-धारणा - ध्यान - समाधयोऽष्टावङ्गानि' इति। एतेषां प्रत्येकं स्वरूपं सम्यगुपपादितम्।

अत्रायं विशेषः यत् अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहरूपे यमे सम्पादिते यानि फलानि दर्शनेऽस्मिन् अभिवार्णितानि तानि सर्वाण्यपि सुगृहीतनामधेयेषु महोदयेषु अस्माभिः द्रष्टुं शक्यन्ते।

यस्य वा जनस्याहिंसायां प्रतिष्ठा सम्भवति तत्सन्निधौ वर्तमानेषु

परस्परविद्वेषिष्वपि वैरहानिः सम्भवति । प्राचीनभारते महर्षीणामाश्रमेषु अधुनातनकाले महात्मनो गान्धिमहोदयस्य च सविधे तादृशी स्थितिरासीदित्यस्माभिः श्रूयते । एवमन्येषामपि प्रयोजनानि समुपवर्णितानि ।

तृतीयः पादः विभूतिपादः । अस्यैव सिद्धिपाद इत्यपि व्यपदेशः । यतः अत्र योगसाध्याः सिद्धयो बह्व्यः प्रतिपादिताः । पादेऽस्मिन् योगाङ्केषु अन्तिमानि धारण-ध्यान-समाधिरूपाणि त्रीण्यङ्गानि सविस्तरं विमृष्टानि ।

"देशबन्धश्चित्तस्य धारणा" इति सूत्रेण पादोऽयं प्रारभ्यते । धारणाध्यानसमाधीनां त्रयाणां संयम इति पातञ्जलानामेषां हि परिभाषा । एतेषां त्रयाणां अन्याङ्गापेक्षयान्तरङ्गत्वं प्रत्यपादि ।

सिद्धिष्वत्यन्तमाश्चर्यकर्यः दर्शनेऽस्मिन् प्रतिपादिताः । यथा - अन्तर्धान - विप्रकृष्टज्ञान - भुवनज्ञान - क्षुत्पिपासानिवृत्ति - परकायप्रवेश - उत्क्रान्ति - आकाशगमन - भूतजय - इन्द्रियजय - अणिमादि - सर्वज्ञातृत्वादयः ।

चतुर्थः कैवल्यपादः । स च "जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः" इत्यनेन सूत्रेण प्रारभ्यते । पादेऽस्मिन् प्रकृतिबद्धस्य पुरुषस्य तस्माद्विमुक्तिः कैवल्यप्राप्तिश्च कथं सम्पद्यत इत्ययमंशः निरूप्यते । सिद्धयः बहुधा सम्भवन्ति । काश्चन जन्मवशात् यथा - आकाशसञ्चारः - जलवासः -निश्चेश्टता - बहुकालजीवित्वं - स्वेच्छावेषधारणं-परकायप्रवेश इत्यादयः ।

तत्र सांख्यशास्त्रप्रवर्तकः कपिलाचार्यः जन्मत एव सिद्धीः इमाः प्राप्तवान् । ओषधिवशान्माण्डव्यादिऋषयः सिद्धीरविन्दन् । मन्त्रोपासनेन नारदादयः । तपसा विश्वामित्रादयः । सर्वापि सिद्धीनां समाधिः प्रधानं कारणम् । निमित्तकारणञ्च जन्मादि ।

अन्ततः एतदस्माभिरवश्यमवगन्तव्यं यत् - मनसः समतासम्पादकोऽसौ योगः अद्यतने अतिविषमे वातावरणे जनानां अभ्युदयमिच्छतां शान्त्यभिलाषिणाञ्च अत्यन्तमुपादेय इति । मनो हि जीवनस्य हेतुः । अतः पातञ्जलं योगशास्त्रं सर्वैरप्यस्माभिः अध्येयं अनुसरणीयं लोककल्याणमिच्छद्भिरिति शम् ।

# 6 नागार्जुनस्य प्रतीत्यसमुत्पादवादः

## प्रबन्धसारः

सुगृहीतनामधेय आचार्यनागार्जुन आन्ध्रदेशीयो माध्यमिकबौद्धमर्यादा परिष्करणमार्मिक इत्यत्र नास्ति लेशतोऽपि विप्रतिपत्तिर्विचक्षणानाम् । शून्यमेव तत्त्वमिति प्रतिपादयता महायानसिद्धान्तप्रचारपरिरक्षणबद्धदीक्षेणानेन बौद्धशिरोमणिना प्रत्यपादि प्रतीत्यसमुत्पादवादः मूलशिलाबन्धायमानो माध्यमिकबौद्धदर्शनप्रासादस्य ।

नागार्जुनप्रणीततया कथ्यमानेष्वपि बहुषु निबन्धेषु माध्यमिकसिद्धान्त सर्वस्वभूतानां माध्यमिककारिकाणां परपक्षनिग्रहदक्षाया विग्रहदक्षाया विग्रहव्यावर्तन्याश्च चकास्ति तावदविगानं तत्कृतित्वेन प्रसिद्धिः ।

अतः पत्रेऽस्मिन् सूक्ष्मेक्षणिकया तत्कृतिपरिशीलनपुरस्सरं प्रतीत्यसमुत्पाद वादस्वरूपस्वारस्याद्यधिकृत्य सङ्ग्रहेण निरूपयितुमाधीयते यत्नः ।

## उपोद्घातः

बौद्धाः खलु वैभाषिक-सौत्रान्तिक-योगाचार - माध्यमिकभेदभिन्नाः चतुर्धाऽवतिष्ठन्त इति न परोक्षं प्रेक्षावताम् । तत्र चकास्ति हीनयान- महायानभेदोऽपि चतुर्षु तेषु प्रवृत्तिभेदनिबन्धनः । वैभाषिकसौत्रान्तिकयोः हीनयानसम्प्रदाये तथा योगाचारमाध्यमिकायोः महायानमार्गे चान्तर्भाव इति बौद्धपण्डितमण्डलीषु निश्चप्रचं वचः । हीनयानपदेन स्थविरवादः प्रायोऽभिधीयते यश्चाधुना थेरवाद इति महतीं प्रसिद्धिं पुष्णाति ।

तत्र निशितया धिया परीक्षायां क्रियमाणायां हीनयानमहायानयोः मध्ये महदन्तरमस्माभिः दरीदृश्यते। यथा हीनयानसम्प्रदाये प्रधानतमं लक्ष्यमात्मनो निर्वाणम्। महायानसम्प्रदाये तु समेषां निर्वाणम्। अत एवास्मिन् सम्प्रदाये श्रमणकस्सज्जो भवति अज्ञानिनामन्येषां निर्वाणसम्पादने बहून्यपि जन्मानि परिग्रहीतुम्। एतदनुरोधमेवाभिधीयते बौद्धसिद्धान्ते हीनयान्यपेक्षया महायानिनां स्थानमुन्नतं प्रस्थानञ्च सुविशालमिति।

महायानमार्गैकदेशिभिः विज्ञानवादिभिः योगाचारैः यानत्रयं प्रविभक्तमिति सुप्रसिद्धोऽयमंशः। यथा चाचकथत् मैत्रेयो मध्यान्तविभागशास्त्रे,[1] अभाषि चासङ्गानुजेन वसुबन्धुना तत्रैव श्रावकयानप्रत्येकबुद्धयानमहायानभेदेन[2]। तत्रापि अन्यविलक्षणं सर्वोत्तमं महायानमित्यत्र न काचिद्विप्रतिपत्तिः।

महायानैकदेशमाध्यमिकसिद्धान्तपरिष्कर्ता प्रवर्तकश्च नागार्जुन इत्यत्र न तावद्विप्रतिपद्यते कश्चिद्विपश्चित्। अन्यादृशोऽस्य पन्थाः माध्यमिकतत्त्वप्रतिपादन इति अनुभवसिद्धं वचनम्। 'सर्वं बुद्धिमयं जगत्' इति प्रतिपादयद्भ्यो योगाचारेभ्यः विभिन्नां प्रत्यग्रां सरणिमनुसरन्नयं सर्वशून्यवादी नागार्जुनः सर्ववैनाशिक इति प्रथते।

## १. नागार्जुनस्य देशकालादिः

नागार्जुनस्य जन्मदेशं कालं वाधिकृत्य नातीव स्पष्टं किमपि प्रमाणमुपलभामहे। लङ्कावतारसूत्र-मञ्जुश्रीमूलकल्प - महामेघसूत्रादिपरिशीलने इदमस्माकं प्रतिभाति यत् - क्रीस्तोः परं प्रथमशतकाब्देऽथवा द्वितीयशतकाब्दे दक्षिणापथे वेदल्याख्यग्रामे लब्धजन्माऽयं नागार्जुनपर्वते तथा श्रीशैले च महायानमतं प्रचारयामासेति[3]। नेपालदेशीयात् आम्नायादेवं ज्ञायते तस्य पिता त्रिविक्रमः माता च सावित्रीति। कियत्पर्यन्तमिदं सत्यमिति सन्देहोऽस्त्येव[4]। असन्देहं बहुधा बहुभिः निर्णीतं, क्रीस्तोः परं द्वितीयशतकाब्दे आन्ध्रप्रदेशस्थगर्तमण्डलान्तर्वर्ति नागार्जुनकोण्ड इति प्रसिद्धे क्षेत्रे अकारि तेन माध्यमिकसिद्धान्तप्रचार इति तावदूरीकर्तुं शक्यते[5]। साम्प्रतमिदमसाम्प्रतं प्रकृतशीर्षकस्येत्यत्रैव विरम्यते।

## २. तस्य कृतयः

यद्यपि नागार्जुनकर्तृकतया बहवो ग्रन्थाः अभिधीयन्ते, तथापि न ते सर्वे तत्कर्तृका इत्यभ्युपगन्तुं शक्यते । १. माध्यमिककारिकाः अथवा मूलमाध्यमिककारिकाः, २. विग्रहव्यावर्तनी ३. रत्नावली ४. सुहृल्लेखः इत्यभिधीयमानाः माध्यमिकतत्त्व - सम्प्रदायप्रकाशनपराः चत्वारो ग्रन्थाः तत्प्रणीता एवेति सूपपादम् । अन्येषां द्वादशमुखशास्त्रप्रज्ञापारमितसूत्र, शून्यतासप्तति, युक्तिषष्ठिका वैपुल्यसूत्र, व्यवहारसिद्धिप्रभृतीनां तत्कर्तृकत्वे सुदृढं प्रमाणं किमपि नोपलभामहे ।

## ३. प्रतीत्यसमुत्पादशब्दार्थः

प्रतीत्यसमुत्पादवादः नागार्जुनेनेदम्प्रथमतया समुदभावित इति वक्तुं न शक्यते । माध्यमिकमतानुरोधं तं परिश्चकार स इति चारित्रकाणामभिसन्धिः । अथ को नामासौ प्रतीत्यसमुत्पादः ? समुल्लसन्ति तावदत्र बहूनि मतानि । यथा - प्रतिः प्राप्त्यर्थः । इण् गताविति गमनार्थको धातुः । ततः ल्यपि प्रतीत्येति भवति । स च प्रतीत्यशब्दः प्राप्त्यर्थकः अपेक्षार्थको वा । सम्+उत् इत्युपसर्गद्वयपूर्वकपदेः प्रादुर्भावोऽर्थः । तथा च हेतुप्रत्ययसापेक्षः भावानामुत्पादः प्रतीत्यसमुत्पाद इति सिध्यति । कारणं प्राप्य कार्यसमुत्पाद एव प्रतीत्यसमुत्पाद इति भावः ।

अन्येषां मते प्रतिः वीप्सार्थः । इतिशब्दो गमनार्थको विनाशार्थको वा । इतौ साधवः इत्याः । प्रति प्रति इत्यानां विनाश्यानां समुत्पादः प्रतीत्यसमुत्पाद इति अभ्यवर्णि । अर्थात् प्रतिक्षणविनाशिनां प्रादुर्भाव इत्युक्तं भवति ।

अपरे तु प्रतिर्वीप्सार्थः । एतिः प्राप्त्यर्थः । एवञ्च तांस्तान् प्रत्ययान् प्राप्य भावानां समुत्पादः प्रतीत्यसमुत्पाद इति कथयन्ति[6] । यथाकथञ्चित् सकारणभावोत्पत्तिरेव प्रतीत्यसमुत्पाद इति सामान्यतया वक्तुमिष्यते । माध्यमिकमतेऽस्मिन् प्रतीत्यसमुत्पादो हि नाम शून्यतेत्याख्यायते । यथोक्तं माध्यमिककारिकासु -

'यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे' इति । [१४-१८]

माध्यमिकनयेऽस्माभिरनुभूयमानाः सर्वे पदार्थाः प्रतीत्यसमुत्पादा इत्युच्यन्ते । कारणं प्राप्य सम्भवन्त इमे सर्वे कारणविघटने न भवन्ति । लोके हि घटः मृत्कुलालचक्रदण्डादौ सति समुत्पद्यते । तदभावे घटाभावः । वस्तुतश्चायं घटः

न मृदि, नापि कुलाले, न चापि चक्रे, नैवापि दण्डे अथवा न तत्समूहे च सम्भवति। व्यस्ततया समस्ततया च तेषु स न सम्भवतीति निस्स्वभावः कथ्यते। निस्स्वभावतया स च शून्य इत्यभिधीयते। यथा घटस्तथा सर्वे भावपदार्थाः निस्स्वभावा भवन्तीति शून्या इत्युदीर्यन्ते। कारणं प्राप्य ये च व्यवहारयोग्या भवन्ति ते सस्वभावा इति वक्तुं नार्हाः। यथोक्तं नागार्जुनेन -

प्रतीत्य यद्यद्भवति न हि तावत् तदेव तत् [१८-१०] इति। अप्रतीत्यसमुत्पन्नस्य धर्मस्य कस्यचिल्लोकेऽनुपलम्भादशून्यः धर्मः कश्चिन्नास्ति[७]।

अत्र नागार्जुनाभिमतः प्रतीत्यसमुत्पादरूपशून्यतापदार्थः दार्शनिकैः बहुभिर्नावगतः सम्यक्। अत्र हि शून्यता नाम केवलं नात्यन्ताभावः। कारणप्रत्ययापेक्ष इत्यर्थः। सति कारणे यद् भवति, असति च कारणे यन्न भवति तच्छून्यमुच्यते। दर्पणे प्रतिबिम्बोपलब्धिः दृष्टान्तः। दर्पणस्य पुरतः सति कस्मिंश्चिद्वस्तुनि आलोके विद्यमाने, सम्भवति प्रतिबिम्बः। सति द्रष्टरि प्रतिबिम्बोपलब्धिरुपजायते। अन्यतमापाये हि तदुपलब्धिर्दुर्लभा भवति[८]। एवमेव सर्वे भावपदार्था इति माध्यमिकानां दर्शनम्।

## ४. प्रतीत्यसमुत्पादपर्यायाः

प्रतीत्यसमुत्पादस्यास्य माध्यमिकमते शून्यता, तथता, उपादाय प्रज्ञप्तिः, मध्यमा प्रतिपदिति पर्यायवचनानि। निस्स्वभावतैव शून्यतेति प्रागवोचाम। कारणमुपादाय कार्यं प्रज्ञप्यत इति उपादाय प्रज्ञप्तिरिति व्यवहार उदजनि। भावाभावान्तद्वयविरहिततया मध्यमा प्रतिपदिति प्रतिपाद्यते[९]।

## ५. प्रतीत्यसमुत्पादाङ्गानि

अभिधर्मकोशभाष्यानुरोधं आवस्थिकक्षणिक - प्राकर्षिक-सम्बन्धिकभेदभिन्नाः प्रतीत्यसमुत्पादाः दरीदृश्यन्ते। तत्र आवस्थिक-प्राकर्षिकयोः सत्त्वाख्यप्रतीत्यसमुत्पाद इति प्रसिद्धिः। एवं क्षणिकसाम्बन्धिकयोः सत्त्वाख्ये तथाऽसत्त्वाख्ये प्रतीत्यसमुत्पादेऽन्तर्भावः। तत्र सत्त्वाख्यप्रतीत्यसमुत्पादस्येमानि द्वादशाङ्गानि भवन्ति। १. अविद्या २. संस्कारः ३. विज्ञानम् ४. नामरूपे ५. षडायतनानि ६. स्पर्शः ७. वेदना ८. तृष्णा ९. उपादानं १०. भवः ११. जातिः १२. जरामरणे इति। आचार्यनागार्जुनेन स्वमाध्यमिककारिकासु

द्वादशाङ्गपरीक्षानाम्नि षड्विंशतितमे प्रकरणे इमानि द्वादशाङ्गानि सम्यक् परिशीलितानि[10]। उक्तपूर्वेष्वङ्गेषु अविद्या-संस्काराख्ये अङ्गे पूर्वस्मिन् जन्मनि भवतः। विज्ञान - नामरूप - षडायतन - स्पर्श - वेदना - तृष्णा - उपादान - भवाभिधानानि अङ्गानि अस्मिन्नेव जन्मनि सम्भवन्ति। जातिः जरामरणे च अनागते जन्मनि भवन्ति। इमान्यङ्गानि प्रतीत्यसमुत्पादहृदयकारिकायां, आर्यशालिस्तम्बसूत्रकारिकायां कात्स्न्र्येन युक्तिषष्ठिका‿ भिसमया लङ्कारादिषु अंशतश्च सुष्ठु निरूपितानि।

अङ्गानामेषां क्रम इत्थम् - अविद्यया अज्ञानेन आच्छादितः पुद्गलः कुशलाकुशलानेञ्ज्यरूपतया कायिकवाचिकमानसिकरूपतया वा त्रिधा विभिन्नान् संस्काराननुतिष्ठति। तैः कर्मभिः पुनर्भवं विन्दते। एतादृशसंस्कारपरीतस्य पुद्गलस्य संस्कारहेतुकं, आत्मत्वेनाभिमतं विज्ञानं देवमनुष्यादिरूपायां गतौ प्रविशति। सन्निविष्टे च विज्ञाने तत्र मातृकुक्षौ नामरूपं च प्रादुर्भवतः। एवं प्रादुर्भूताभ्यां नामरूपाभ्यां दर्शन-श्रवण-घ्रान-रस-स्पर्श-मननरूपं षडायतनं प्रादुर्भवति। षडायतनमिदमागम्य संस्पर्शः समुपजायते। संस्पर्शविषये एषा हि तेषां परिभाषा। चक्षुः, रूपं समन्वाहारं चेति त्रितयं प्रतीत्य प्राप्य चक्षुर्विज्ञानमुपजायते, तत्र हि रूपं विषयः, नामैव स्कन्धलक्षणं समन्वाहार इत्युच्यते। एतेषां इन्द्रियविषयविज्ञानां त्रयाणां सन्निपातः, अन्योन्योपकारेण तुल्या प्रवृत्तिः संस्पर्श इति सङ्गीर्यते। संस्पर्शादस्मात् इष्टानिष्टोदासीनविषयानुभूतिरूपा वेदना सञ्जायते। वेदनामूलिका वेदनाविषया तृष्णा तत उत्पद्यते। सुखवेदनाप्रयुक्तः तस्याः संयोगमभिलषते। एवमभिलषमाणः चतुर्विधमुपादानं, कर्म समुपादत्ते। अर्थात् तृष्णया प्रेरितः बहूनि कर्माण्यनुतिष्ठति। तृष्णाप्रेरितस्सन् यः कर्माणि करोति तस्य भवः अवश्यंभावी। यस्य वा कर्मोपादानतया तृष्णा न भवति यश्च पुनः प्रतिसंख्यानेन तृष्णां भस्मीकुर्वन् उपादानमेव न परिगृह्णाति तस्य भवः न प्रवर्तते। स च मुच्यते।

भवो हि नाम पञ्चस्कन्धात्मकः अनागतः। कायिकं, वाचिकं, मानसिकं कर्म भवत्यस्मिन्निति भवः। भवात्तस्मादनागतं स्कन्धान्तरं जातिः। सा च पूर्वस्मात् स्कन्धपञ्चकादुपजायते। जातेस्तस्याः जरामरणादिकं प्रवर्तते। जरा हि नाम स्कन्धपरिपाकः। मरणञ्च जीर्णस्कन्धभेदः। दुःखं हि पञ्चेन्द्रियसन्निपातः। शोकश्च हृदयसन्तापः। परिदेवना च वाक्प्रलापः। दौर्मनस्यं मनसः अनिष्टोपनिपातः। उपायासः दुःखबाहुल्यम्। एतानि सर्वाण्यपि जातेरुत्पन्नानि। एवं द्वादशाङ्गानि प्रतीत्यसमुत्पादस्य माध्यमिकमते प्रतिपादितानि।

## ६. तस्य निर्वाणौपयिकता:

प्रतीत्यसमुत्पादोऽयं कथं नाम निर्वाणौपयिक इत्यत्र नागार्जुनः माध्यमिककारिकास्वेवं प्रतिपादयति। यथा -

अविद्यायां निवृत्तायां संस्काराणामसम्भवः।
अविद्याया निवृत्तिस्तु ज्ञानेनैवास्य बाधनात्॥

तस्य तस्य निरोधेन तत्तन्नाभिप्रवर्तते।
दुःखस्कन्धः केवलोऽयमेवं सम्यङ्निरुध्यते॥

इति[11] । सत्याञ्चाविद्यायां संस्काराः, निवृत्तायाञ्च तस्यां संस्काराणामसम्भवः । कथञ्च साऽविद्या निवर्तेतेत्याकांक्षायां एतावता समुपदिष्टस्य प्रतीत्यसमुत्पादस्य यथावदपरीतभावनाद्वारा अविद्यानिरोधः । ज्ञाननिवर्त्यं हि नामाज्ञानम् । यश्च प्रागुक्तं प्रतीत्यसमुत्पादं सम्यक् पश्यति सूक्ष्मस्यापि भावस्य स्वभावं न पश्यति । प्रतिबिम्ब - स्वप्न - अलातचक्रादिवत्सर्वेषां भावानां स्वभावशून्यतां पश्यति। एवं शून्यतायामवगतायां न बाह्यं नाप्यान्तरं किमपि वस्तु तस्योपलभ्यते। एवं किमपि कर्माचरति। अतः प्रतीत्यसमुत्पादरूपशून्यभावनया तत्त्वदर्शिनः अविद्यानिवृत्तिः। ततः संस्कारनिरोधः । एवमात्मात्मीयादिदर्शनायासविनिर्मुक्तस्य तस्य कारकवेदकरहितं स्वभावशून्यं दुःखस्कन्धं निरुद्धं भवति। अत एव सर्वोपशमः निर्वाणमिति कथयन्ति माध्यमिकाः यथा। -

सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः।
न क्वचित् कस्यचित्कश्चिद्धर्मो बुद्धेन देशितः[12] ॥
अप्रहीणमसम्प्राप्तमनुच्छिन्नमशाश्वतम्।
अनिरुद्धमनुत्पन्नमेतन्निर्वाणमुच्यते॥ इति।[13]

बौद्धैः खलु सोपाधिशेषनिर्वाण- निरुपाधिशेषनिर्वाणभेदेन निर्वाणद्वयमभ्युपागामि । उप आधीयतेऽस्मिन्नात्मस्नेह इत्युपाधिः । आत्मप्रज्ञप्तिनिमित्ताः उपादानस्कन्धाः पञ्चसंख्याका· उपाधिपदेनोच्यन्ते । शिष्यते इति शेषः । उपाधिरेव शेषः उपाधिशेषः। तेन सह वर्तत इति सोपाधिशेषं निर्वाणमिति तेषां प्रक्रिया। सत्कार्यदृष्ट्यादिक्लेशतस्कररहितं स्कन्धमात्रमेव तत्र अवशिष्यते। निहताशेषचोरगणग्रामवत्। यत्र स्कन्धमात्रमपि नास्ति तन्निरुपाधिशेषं निर्वाणम् । तैलनाशे प्रदीपनाशवत्[14] । क्लेशस्कन्धनिरोधादिदमुभयमपि सिध्यति। स च

निरोधः प्रतीत्यसमुत्पादनिबन्धनः [15] ।

## ७. उपसंहारः

यदि शून्यमेव तत्त्वं तर्हि नैवोदयो नापि व्यय इति दुःखसमुदय निरोध - मार्गोपदेशरूपाणामार्यसत्यानां का कथा? इष्टापत्तिरिति चेत् सकृत्-आगामि - अनागामि - अर्हदाख्यं आर्यफलचतुष्टयं नोपपद्येत । तथा फलाभावे फलस्था आर्यपुदगलाश्च न भवन्ति । का नो हानिरिति चेत् संघ-धर्म-बुद्धाख्यानि त्रीणि रत्नानि न सिध्यन्ति । संघे चासति धर्मोपदेष्टा बुद्धोऽपि न भवेदिति प्राप्ते समाधानमुच्यते - शून्यतायाः अभावो नार्थः । सर्वप्रपञ्चोपशमः शून्यतोपदेशप्रयोजनम् । अत एवास्मिन् मते शून्यता प्रतीत्यसमुत्पादरूपेति प्रत्यपादि। एवञ्च प्रतीत्यसमुत्पादो हि शून्यतेति स्थविरवादिभ्यो विभिन्नं पन्थानमनुरुन्धान आचार्य नागार्जुनस्समिन्धे। अत एव तावदूरीकरोति संवृतिसत्य - परमार्थ सत्यभेदेन सत्यद्वयम्। शून्यतां नागार्जुनप्रतिपादितामभावरूपतया स्वीकृत्य भ्रान्ता बहवो दार्शनिकाः। शून्यताभिवर्णनेऽत एव सत्यद्वयव्यवस्था मनसि कर्तव्येति मुक्तकण्ठमुदघोषयति । यश्च सत्यद्वयविभागमनाश्रित्य संस्काराणामभावरूपां शून्यतामवधारयति तं मन्दबुद्धिं शून्यतादुर्गृहीतस्सर्प इव दुष्प्रसाधिता विद्येव विनाशयतीति। यथा -

विनाशयति दुर्दृष्टा शून्यता ह्यन्धमेधसम्।
सर्पो यथा दुर्गृहीतो विद्या वा दुष्प्रसाधिता॥

इति [16] । एवं नागार्जुनस्य प्रतीत्यसमुत्पादवादं स्थालीपुलाकानयेन परिशीलयन्तो वयं कलयामहे नानृतभाषिणः स्मः ।

## NOTES :

1 गुणदोषाविकल्पेन ज्ञानेन परत स्वयम्। निर्याणादपर ज्ञेयम्। म.वि. शा १२०

2 यानत्रयं यथायोगम् । तत्र निर्वाणससारयोः गुणदोषज्ञानेन परत श्रुत्वा निर्याणार्थेन श्रावकयानम्। तेनैव स्वयमश्रुत्वा परतो निर्याणार्थेन प्रत्येकबुद्धयानम्। अविकल्पेन ज्ञानेन स्वयं निर्याणार्थेन महायान वेदितव्यम्। भाष्य १२०.

3. दक्षिणापथवेदल्यां भिक्षुः श्रीमान् महायशाः ।
नागाह्वय स नाम्ना तु सदसत्पक्षदारक ॥
प्रकाश्य लोके मतमेतन्महायानमनुत्तमम्।
आसाद्य भूमि मुदिता यास्यतेऽसौ सुखावतिम्॥
लङ्का १६५

4. An unreliable source, the Nepalese 'Amnayah' says their names were Trivikrama and *savitri.* Nagar 48.

5. Ibid 48.

6. सुबो २.

7. अप्रतीत्यसमुत्पन्नो धर्मः कश्चिन्न विद्यते।
यस्मात्तस्मादशून्यो हि धर्मः कश्चिन्न विद्यते॥ मा. का. २४-२९

8. वि. व्या. ३२.

9. यः शून्यतां प्रतीत्यसमुत्पादं मध्यमां प्रतिपदं च।
एकार्थं निजगाद प्रणमामि तमप्रतिमबुद्धम्॥ वि. व्या . ७२

यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे।
सा प्रज्ञप्तिरुपादाय प्रतिपत्सैव मध्यमा॥ मा. का . १४-१८

10. तत्रैव १४.२.

11. तत्रैव २६. ११-२२.

12. तत्रैव १६-२४.

13. तत्रैव १५-३.

14. दीपो यथा निवृतिमभ्युपेतो नैवावनिर्गच्छति नान्तरिक्षम्।
दिशं न काञ्चिद्विदिशं न काञ्चित्स्नेहक्षयात्केवलमेति शान्तिम्॥

एवं कृती निवृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।
दिशं न काञ्चिद्विदिशं न काञ्चित्क्लेशक्षयात्केवलमेति शान्तिम्॥
सौन्दर. १६, १८-२९.

15. सुबो. १३४

यः प्रतीत्यसमुत्पादं पश्यतीदं स पश्याति।
दुःखं समुदयं चैव निरोधं मार्गमेव च॥ मा.का. २४-४०

16. तत्रैव १४-११.

## BIBLIOGRAPHY & ABBREVIATIONS

मध्यान्तविभागशास्त्रम् (=म.वि.शा.)
आर.सि.पाण्डेयः
दिल्ली, 1971.

मध्यान्तविभागशास्त्रभाष्यम् (=भाष्य.)
आर.सि.पाण्डेयः

दिल्ली, 1971.

मध्यमिककारिका: (=मा.का.)
के. सोमशेखरशास्त्री
काकिनाड, 1958.

लङ्कावतारसूत्रम् (=लङ्का.)
Daisetz Teitero
Suzuki, LONDON, 1932.

विग्रहव्यावर्तनी (=वि.व्या.)
जि.वि. कृष्णाराव्
तेनालि, 1958.

सुबोधिनी (=सुबो.)
के. सोमशेखरशास्त्री
काकिनाड, 1958.

सौन्दरनन्दम् (=सौन्दर.)
चौखम्बा संस्कृत सिरीज
वारणासी, 1937.

The Concept of Buddhist Nirvana (= CBN)
Stcherbatsky
Varanasi, 1975.

Glimpses of Buddhism (=GB)
N. Ramesan
Hyderabad, 1961.

Madhyamika Dialectic and
The Philosophy of Nagarjuna (=MDP)
S. Rinopoche
Saranath, 1977.

Nagarjuna (=Naga)
K.S.Murthy
New Delhi, 1971.

# 7 मल्लिनाथस्य मीमांसाशास्त्रपाण्डित्यम्

## १. प्रबन्धसारः

इह जगति पद - वाक्य - प्रमाण विवेकचतुरा धिषणा यथा शास्त्रार्थतत्त्वावगाहनचणा तथैव कविताकामिनीकमनीयरसार्द्रकटाक्षा-लङ्कारसौभाग्यसमीक्षणविचक्षणा चेत्यत्र न हि नाम साहितीरसास्वादनायत्तचेतसां सचेतसां अस्ति काचन विप्रतिपत्तिः। आन्ध्रभारतीभाग्यभूमिः व्याख्यातृचक्रवर्ती, सौजन्यजन्ययशस्सुगन्धिः कोलाचलकलशाम्बुधिचन्द्रमाः पण्डितराजो मल्लिनाथः पद - वाक्य - प्रमाण पारावारपरीण इति जागर्ति तावन्महती प्रसिद्धिः तद्व्याख्यानग्रन्थनिबन्धना लोके।

अत्रास्मिन् शोधप्रबन्धे 'शास्त्रम्' इत्यन्वर्थनामधेये पूर्वतन्त्रे कीदृशं तस्य पाण्डित्यमिति तत्कृतिपरिशीलनपुरस्सरं सूक्ष्मेक्षणिकया विचारयितुमाधीयते तावद्यत्नः।

## २. मल्लिनाथस्य मीमांसकत्वे बाह्यानि प्रमाणानि

भारतभारतीप्रणयजनसमादरणार्हो विशेषतश्चान्ध्रजनसम्माननीयो मल्लिनाथः महाविद्वान् मीमांसाशास्त्र इत्यत्र समुल्लसन्ति बहूनि बाह्यान्यपि प्रमाणानि। तत्र सर्वप्रथमं तावत्प्रमाणमिदम्। यत् अनेन स्वकीयसकलव्याख्यानारम्भे संदृब्धं तथा एतत्पुत्रेण कुमारस्वामिना च प्रतापरुद्रयशोभूषणव्याख्यानस्य रत्नापणाभिधानस्य चारम्भे समुद्धृतं[1] च हृद्यमिदं पद्यम्-

वाणीं काणभुजीमजीगणदवासासीच्च वैयासिकीं
अन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत्।
वाचामाचकलद्रहस्यमखिलं यश्चाक्षपादस्फुरां

लोके ऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥

इति। अत्र "अन्तस्तन्त्रमरंस्त" इति प्रयोगस्वारस्येनास्माभिरिदमुन्नेतुं शक्यते यत् कीदृशी प्रीतिस्तस्य पूर्वमीमांसाशास्त्रे इति । इदमस्माकमतिरोहितमेव भवति यत् अन्येभ्यः 'अजीगणत्' 'अवासासीत्' इत्यादिभ्यः क्रियापदेभ्यः 'अरंस्त' इति प्रयोगेण अतिमहत् नैर्भर्यं पूर्वतन्त्रे तेन प्रादर्शीति, तथा 'अन्तः' इत्यनेन पूर्वमीमांसाशास्त्रमर्मज्ञोऽयं मल्लिनाथ इति च।

एवमेव एकावलीव्याख्यानस्य तरलसमाख्यानस्य अन्ते अपह्नुत्यां तन्त्रे स्वकीयं स्वातन्त्र्यं उदारगम्भीरया सरण्या समाविष्करोति [2] । यथा-

पारीणाः पदसागरस्य कतिचित्तन्त्रे स्वतन्त्राः परे
केचित्कर्कशतर्कवक्रभणितिप्रौढिप्रियंभावुकाः ।
अन्ये सत्कवितामृताब्धिलहरीमृष्टांशमुष्टिंधयाः
नैते केऽपि वयं तु किं तु त इमे सर्वे बहूकुर्वते ॥ इति।

तथैव कुमारस्वामी स्वरत्नापणारम्भे स्वतातपादविद्यावैशद्यप्रति पादकं 'वाणीं काणभुजी' मिति श्लोकरत्नमुदाहृत्य अनुपदमेव तावदेवं प्रस्तौति । यथा -

त्रिस्कन्धशास्त्रजलधिं चुलुकीकुरुते स्म यः ।
तस्य श्रीमल्लिनाथस्य तनयोऽजनि तादृशः ॥

इति । [3] अत्र त्रिस्कन्धशास्त्रजलधिः पद - वाक्य-प्रमाण-पारावार एवेति सुप्रसिद्धोऽयमंशः ।

एवमेव काव्यग्रन्थव्याख्यानां संजीविन्यादीनां [4] तरलव्याख्यानस्य चान्ते गद्ये, [5] तथैव तत्तनयस्य कुमारस्वामिसोमपीथिनः रत्नापणव्याख्यानस्य चान्ते[6] अविकृत्या दृश्यमानं पद - वाक्य - प्रमाण पारावारपारीण इति विशेषणं वाक्यशास्त्रापरनाम्नः पूर्वमीमांसाशास्त्रस्य वैदुष्यमस्य प्रथयति तराम् । व्याकरणं - मीमांसा-न्यायं च अनेनैव क्रमेण पदवाक्यप्रमाणशास्त्रत्वेन प्रथमतः व्यवहृतवान् सप्तमशतकवासी भट्टबाणः कादम्बर्यामित्यस्माभिरवधेयम् [7]।

## २.१ तन्त्रवार्तिकटीका सिद्धाञ्जनम्

वैदिकसार्वभौमेन कुमारिलभट्टेन शाबरभाष्यस्योपरि प्रणीता व्याख्या तन्त्रवार्तिकमिति नाम्ना प्रथते । मीमांसाशास्त्रे प्रधानतमोऽयं ग्रन्थः । तन्त्रवार्तिकस्यास्य सिद्धाञ्जननाम्नी टीका काचित् स्वयं प्रणीतेति तरलव्याख्याने कण्ठरवेणैव तावदयं मल्लिनाथः स्पष्टीकरोत्येवम् -

उपादेयविधेयत्वगुणत्वानि यजेः फले ।
उद्देश्यत्वानुवाद्यत्वप्राधान्यानि गुणान्वये ॥

इति । इहोद्देशो मानसी विवक्षा । उपादेयत्वमनुष्ठेयत्वम् । तत्र सिद्धस्योद्देशः साध्यस्यानुष्ठानमिति सिद्धसाध्यभावादुद्देश्यत्वोपादेयत्वयोर्विरोधः प्राप्ताप्राप्तरूपत्वादनुवाद्यविधेयत्वयोर्गुणप्रधानत्वयोस्तत्वादेवेत्यलं प्रसक्तानु प्रसक्तता। तदेतत् सम्यग्विवेचितमस्माभिः तन्त्रवार्तिक टीकायां वाजपेयाधिकरणे इति [८]। अहो बत कालस्य विषमा गतिः। महीयसी सा टीका अस्मद्दौर्भाग्यवशात् नाद्यापि समुपलभ्यते।

एवमेव तन्त्रवार्तिकस्य व्याख्या काचन मल्लिनाथेन कृतेत्यत्र तत्पुत्रस्य कुमारस्वामिसोमपीथिनः वचनं अन्यत्प्रमाणम्। तेन स्वकीये प्रतापरुद्रीयव्याख्याने रत्नापणसमाख्याने लक्षणावृत्तिविवरणे तावदेवमभ्यधायि -

तदुक्तं तातपादैः एकावलीतरले तन्त्रवार्तिकव्याख्याने सिद्धाञ्जने च -
स्वार्थत्यागे समानेऽपि सह तेनान्यलक्षणा।
यत्तेयमजहत्स्वार्था जहत्स्वार्था तु तं विना ॥

इति [९]। उक्तपूर्वाभ्यां मल्लिनाथ - कुमारस्वामिसोमपीथि वचनाभ्यां इदमस्माभिः प्रत्येतुं शक्यते यत् मीमांसादर्शनसारवेदिताऽसौ तन्त्रवार्तिकस्य प्रसन्नगम्भीरं सिद्धाञ्जनं नाम व्याख्यानं प्राणैषीदिति। भाट्टप्रस्थानमूलभूतस्य तन्त्रवार्तिकस्य व्याख्यानिर्माणं हि नाम दुस्साधं भवति विचक्षणानाम्। मीमांसाशास्त्रमर्मज्ञतया मल्लिनाथस्य सुसाधं तदासीदित्यत्र न कश्चित्संदेहलेशः।

## ३. एकावल्याः मीमासकावगाह्यता

क्रीस्तोः परं चतुर्दशशतकारम्भे लब्धजनुषा विद्याधरनाम्ना विद्वत्तल्लजेन अष्टोन्मेषसमुल्लसिता अलङ्कारशास्त्रसंप्रदायनिरूपणपरा एकावली नाम्नी

कृतिः काचित् संदृब्धा। नूनं विद्याधरोऽयं सकलविद्याधरः अन्वर्थनामधेयः। एकावल्यां दृश्यमानायां प्रत्युन्मेषं बहवः शास्त्रसंप्रदाया दृग्गोचरीभवन्त्यस्माकम् । तत्र सूक्ष्मेक्षणिकया परीक्षायां क्रियमाणायां मीमांसाशास्त्रस्य मर्यादाविशेषाः प्रस्फुटं अस्माभिः साक्षात्क्रियन्ते येषां परिचयमन्तरा ग्रन्थकर्तृस्तात्पर्यं दुरवगाहं जायेत।

पश्यत त्रिचतुराणि स्थलानि। ग्रन्थारम्भे मङ्गलविचारे किं नमस्कारात्मकं कर्म शास्त्रस्य अङ्गं उत प्रधानमिति विकल्प्य, यद्यङ्गं, तर्हि किं सन्निपत्योपकारकमथवा आरादुपकारकमिति विमृश्य, पश्चात् यदि प्रधानं तर्हि किमिदं नित्यं, नैमित्तिकं, काम्यं चेति विकल्प्य सुबहु विमृश्य आद्यं द्वयं निरस्य काम्यतां निश्चिन्वन् सोदाहरणं मीमांसकसम्प्रदायः विशदीकृतः। ध्वनिनिरूपणप्रस्तावे "प्रतीयमानं प्रति विवदमानान् अभिहितान्वयवादिनः नैयायिकान्[10] वदामः" इत्युपक्रम्य भाट्टाभ्युपगतः अभिहितान्वयवादः महता संरम्भेण प्रत्यपादि।

तथा वृत्तिनिरूपणावसरे "अनुवाद्यानामर्थानां विधेयार्थपरत्वं तात्पर्यमिति, तात्पर्यस्य व्यापारान्तरत्वं परैरभ्युपगतमिति मीमांसकमतं सम्यगनूदितम्"।

पुनश्च अभिधातात्पर्यादिविषयत्वं रसस्य नास्तीति निरूपयन् अप्राप्तं हि विधेयमिति उक्त्वा "लोहितोष्णीषाः ऋत्विजः प्रचरन्तीति" मीमांसकोदाहरणं स्वीकृत्य तन्मतं सम्यग्विवृतम्।

एवमेव बहुषु स्थलेषु अनुपजातमीमांसाशास्त्रपरिचयस्य जनस्य दुरवगाहाः सन्दर्भा जाग्रत्येकावल्याम्। अस्यास्तादृश्याः प्रकाशिका महामहोपाध्यायेन महामीमांसकेन मल्लिनाथेन प्रणीता तरलव्याख्या सङ्गतार्थेति सर्वसम्प्रतिपन्नं वचः।

## ३.१ तरलव्याख्याने तलस्पर्शि मीमांसाशास्त्रपाण्डित्यम्

तरलव्याख्यानदर्शनेऽस्माकमिदमनुपदमेव प्रतिभाति यत् मीमांसा दर्शने समस्त्यनल्पोऽधिकारः मल्लिनाथस्येति। सरला चेयं तरलव्याख्या मल्लिनाथप्रणीतसिद्धाञ्जनदौर्लभ्यसञ्जाततिमिरान् तन्मीमांसावैदुष्यावजिगमिषून् अस्मानमृतवर्तिकेव चन्द्रलेखेव समाश्वासयन्ती समुल्लसति। प्रसन्नरमणीये तरलेऽस्मिन् प्रसन्नपदावलीसनाथेन[1] मल्लिनाथेन पञ्चविंशतिस्थलेषु मीमांसाधिकरणस्थविषयसंवादपुरस्सरं मूलार्थः सप्रपञ्चं व्याख्यातः। कतिचिदेव

स्थलान्यत्र सङ्ग्रहेण समुपस्थाप्यन्ते मया॥

शब्दप्रधानो वेदः प्रभुसम्मित इति प्रतिपादयन् । शब्दश्चात्र विधिप्रत्ययोपलक्षितं वाक्यं, प्रवर्तकत्वमेव तस्य प्राधान्यमिति व्यवारीत् । ततः प्रत्ययस्यैव प्रवर्तकत्वे समुपपद्यमाने कथं वाक्यस्य प्रवर्तकत्वमुच्यत इत्याशंक्य प्रत्ययः विशिष्टः प्रवर्तक इत्युक्ते वाक्यमेव प्रवर्तकमित्यनुक्तिसिद्धमिति सम्यङ् निरूपयन् चोदनास्वरूपप्रतिपादिकां कारिकामपि कांचनोद्धरति ।[11]

तथैव ध्वनिनिरूपणप्रस्तावे विद्याधरः एकावल्यां "अभिहितानामेव पदार्थानामन्वय" इति मन्वानान्................नैयायिकान् वदामः "इति मीमांसकमतं खण्डयामास । तत्रत्यतरले मल्लिनाथेन तावदेवं व्यलेखि मीमांसासिद्धान्तः - मीमांसकाः अभिधेयातिरिक्तं प्रतीयमानं नाभ्युपगच्छन्ति । ते च अभिहितान्वयवादि - अन्विताभिधानवादिभेदेन द्विधा भिन्नाः । न्यायवेदितया तेऽपि नैयायिका भवन्तीति ।"[12]

एवमेव विद्याधरप्रतिपादितं अभिहितान्वयवादिभाट्टमतं स्वीकृत्य, पदार्थै रनुरक्तोऽसौ वाक्यार्थः सम्प्रतीयत्, इति भट्टपादोक्तिमनुस्मरन् वाक्यार्थे कारणं पदार्था एवेति तदभूताधिकरणसिद्धान्तं करबदरवत् सुविशदं प्रदर्शयन् स्वमीमांसाशास्त्रवैदुष्यमाविश्चकार । [13]

अन्यत्रापि द्वितीयोन्मेषे लक्षणाविचारान्ते "ज्ञानविषयादभिन्नत्वेन फलस्याभ्युपगमात्॥ विषयो हि नीलादिः । फलं तु प्राकट्यमिष्यते" इति विद्याधरपङ्क्तिव्याख्यानावसरे अतिसूक्ष्मानप्यंशानाविष्करोत्येवम् -

नीलादिः घटादिरित्यर्थः । प्राकट्यं ज्ञातता । सा च ज्ञानजन्या ज्ञानानुमापिका विषयनिष्ठा । यत्प्रसादात् ज्ञातो घट इति विशिष्टव्यवहारो जायत इति ज्ञाततावादिनः" इति ।[14]

चतुर्थोन्मेषे वाच्यसिद्धयङ्गप्रभेदनिरूपणावसरे मीमांसाशास्त्रसिद्ध सन्नि पत्योपकारक आरादुपकारकरूपाङ्गद्वयं उदाहरणतया प्रदर्श्य सम्पादयति समन्वयमित्यहो मीमांसशास्त्रसम्प्रदाये तस्य समादरः। [15]

षष्ठोन्मेषे अविमृष्टविधेयांशविचारारम्भे विधेयस्यार्थस्य प्राधान्यं अनुवाद्यस्या प्राधान्यमिति विद्याधरपङ्क्तिमवलम्ब्य सोपष्टम्भं वाजपेयाधिकरणसारः प्रदर्शितः ।[16] पश्चात् प्रकृते विधेयप्राधान्यं नाम तात्पर्यविषयत्वमात्रं, अप्राधान्यमनुवाद्यस्य

तात्पर्यविषयत्वमात्रमिति, मीमांसकानामिव दधिहोमगतं शेषशेषिभावलक्षणं, गुणप्रधानभावं नात्र युज्यत इति रुचिरतरा गमनिका समाविष्कृता।[17]

सहोक्तिव्याख्यानेऽप्येवमेव वस्तुतस्त्वित्यारभ्य शाखाप्रस्तरयोरिव शरशात्रवयोरपि शाब्द एव गुणप्रधानभाव इति महता प्रपञ्चेन न्यरूपि।[18]

अन्यत्र पर्यायोक्तप्रस्तावे अलङ्कारः अलङ्कार्यस्य शेषः न तु विपरीत इत्युक्त्वा यथैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र द्वितीयानिर्देशात् प्रधानगार्हपत्यानुरोधेनाप्रधानस्य ऐन्द्रीशब्दस्यान्यथानयनं तद्वदिति भावः। इति [19] दृष्टान्ततया मीमांसाशास्त्रार्थमुपसङ्गृह्णाति।

तथा यथासंख्यालङ्कारव्याख्याने मीमांसाशास्त्रसिद्धं देशसामान्य रूपं क्रमं सोदाहरणं निरूप्य समन्वयोऽकारि [20]।

एवं मीमांसाशास्त्रे मल्लिनाथस्य विद्यमानं तलस्पर्शिपाण्डित्यं तरलव्याख्याने बहुषु स्थलेषु अस्माभिरक्षिसात्कर्तुं शक्यते। एतावता विस्तरभिया विरम्यते।

## ३.२ समुद्धतानि मीमांसाधिकरणानि

मीमांसाशास्त्रसम्प्रदायप्रकाशनबहुले तरले मल्लिनाथेन महामीमां सकेन बहूनि मीमांसाधिकरणानि नामोत्कीर्तनपुरस्सरं समुद्धतानि। कानिचिदधिकरणानि नामोच्चारणं विना स्पष्टानि। मङ्गलविचारे ज्योतिष्टोमरात्रिसत्रविश्वजिदधिकरणानि उदाहरणतया विकल्परूपेण प्रदर्शितानि [21]। ततः सङ्केतविचारे आकृत्यधिकरणं, [22] तद्भूताधिकरणमिति [23] द्वयम्। तथा अविमृष्टविधेयांशविचारे वाजपेयाधिकरणमिति [24] इमान्यधिकरणानि मुख्यानि कण्ठरवेण तरलव्याख्याने समुद्धतानि।

## ३.३ भाट्ट - प्राभाकरमतविवेकः

भाट्ट - प्राभाकरभेदेन - द्विधा विभिन्ने पूर्वतन्त्रे मल्लिनाथः प्रामाणिकः पण्डित इत्यत्र तरलव्याख्याने बहूनि स्थलानि समुपलभ्यन्ते। भाट्टतन्त्रे तद्वैदुष्यं एतावता बहुधा प्रत्यपादि। प्राभाकरतन्त्रसम्प्रदायांश्च सम्यगयमनुवदति तरलव्याख्याने

। प्रथमोन्मेषे अन्विताभिधानवादस्वरूपं सम्यङ्‌ निरूपयामास। [25] तथा तत्रैव पदवद्वाक्यमपि वाचकमिति गुरुमतं सोदाहरणं प्रतिपादयति। [26]

द्वितीयोन्मेषे शब्दार्थस्वरूपनिरूपणावसरे अन्विताभिधानवादिनां गुरूणां लक्ष्यार्थेऽपि सङ्केत इष्यत इति तत्सम्प्रदाय आविष्कृतः।

## ३.४ काव्यव्याख्यानपरामर्शः

काव्यव्याख्यानेभ्य एव मल्लिनाथस्य महती प्रसिद्धिस्समुज्जृम्भते लोके। सा च तद्व्याख्यानसरणिनिबन्धनेत्यत्र न काचिदतिशयोक्तिः।

तत्र मीमांसाशास्त्रार्थसन्दर्भा यद्यपि व्याख्यानेषु विरलाः अथापि तेषु प्रस्फुटं तस्य सहजवैदुष्यं मीमांसाशास्त्र इति न पृथग्वक्तव्यम्। पश्यत-

नैषधीयचरिते पञ्चमसर्गस्थस्यास्य श्लोकस्य रुचिरं तद्व्याख्यानम्-

विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये।
विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय॥

नारदः देवेन्द्रं ददर्श कदाचित्, देवेन्द्रः तदा उपेन्द्रमधिकृत्यैवं प्रस्तौति। विश्वरूपकलनात् सर्वार्थसाक्षात्करणात् मत्स्याद्यनेकरूपधारणात् पूर्वमीमांसासूत्रप्रणेतृजैमिनित्वं उपेन्द्रस्य प्राप्तम्। देवानां शरीरं नास्ति इति तन्निराकरिष्णुः "वज्रहस्तः पुरन्दरः" इत्यादि वाक्यजातस्य अर्थवादत्वान्निरभिधेयतां निनाय। अन्यत्र देवानां युद्धमसहमानः स्वायुधेनैव प्रवर्तमानश्च मम वज्रायुधं व्यर्थतां नीतवान्। अत्र जैमिनिमतानुसारं देवानां अर्थवादरूपतया निरभिधेयता चेति रहस्यं मल्लिनाथेन सुष्ठु व्याख्याने ज्ञाप्यते। [27]

एवमेव शिशुपालवधादेकः श्लोकः [28] -

प्रतिशरणमशीर्णज्योतिरग्न्याहितानां
विधिविहितविरिब्धैः सामिधेनीरधीत्य।
कृतगुरुदुरिताघध्वंसमध्वर्युवर्यैः
हुतमयमुपलीढे साधुसान्नाय्यमग्निः॥

अत्र मल्लिनाथः मीमांसासम्प्रदायानुरोधं श्लोकमेनं व्याचख्यौ। यागशालासु सामिधेनी - मन्त्रोच्चारणपुरस्सरं अध्वर्युभिः समर्प्यमाणं सान्नायां अग्निहोत्रः स्वीकरोति।

अत्र सान्नाय्यं न दधिपयसी, किन्तु हविर्मात्रपरम्। "प्रतो वाजा" इत्यादयः मन्त्राः सामिधेनीमन्त्राः। याज्यपुरो_ नुवाक्या मन्त्राश्चात्र स्वीकर्तव्याः। अत्र मल्लिनाथेन सान्नाय्यविषये महती शास्त्रचर्चा कृता।

## उपसंहारः

तन्त्रवार्तिकस्य सिद्धाञ्जनटीकां प्रणीय एकावलीतरलव्याख्याने बहुधा बहुत्र मीमांसकसम्प्रदायानाविष्कृत्य, कालिदासादीनां काव्यव्याख्यानेषु यावदावश्यकं मीमांसाशास्त्रपरामर्शं विधाय व्याख्यातृचक्रवर्ती पण्डितमण्डलीमण्डनायमान पदवाक्यप्रमाणपारावार पारीण इति लब्धपर्तिष्ठः महामहोपाध्यायो मल्लिनाथः अधीती मीमांसाशास्त्र इति पूर्वोक्ताभिरमलाभिर्युक्तिभिः समुचितैः ग्रन्थसंवादेश्च निर्णयन्तो वयं मन्यामहे नापभाषिणः स्मः।

NOTES :

1. प्रता. पृ. २.
2. तरल. पृ ३३६.
3. प्रता. पृ १.
4. रघु. पृ. १
5. तरल पृ ३३६.
6. प्रता. पृ. ३०४.
7. काद. पृ ३६.
8. एका. तरल. पृ. १५२.
9. प्रता पृ ४४
10. नैय्यायिकान् न्यायवेदिन. मीमासकानित्यर्थ
    तरल. पृ ३५.
11. ननु पुरुषप्रवृत्तिरूपां भावनां विदधानः प्रत्यय एव प्रवर्तकः तस्य प्रेरणार्थे विधानात् तत् कथं वाक्यं प्रवर्तकमिति चेदहो पल्लवग्राहि पाण्डित्यमायुष्मतो येन प्रत्ययः प्रवर्तक

इत्याकलयता स च विशिष्ट इति नाकलितम्। तदाकलने वाक्यमेव प्रवर्तकमित्यपि किं नाकलये । तथाहि। न हि भावयेदित्युक्ते कश्चित् प्रवर्तते किं त्विदमनेनैवं भावयेदिति । तथा सत्यंशत्रयविशिष्टभावनाभिधायी प्रत्ययः प्रवर्तक इति वाक्यमेव प्रवर्तकमित्युक्त भवति। तदुक्तमाचार्यैः कारिकायाम् -

किमाद्यपेक्षितै पूर्णः समर्थः प्रत्ययो विधौ।
तेन प्रवर्तकं वाक्यं शास्त्रेऽस्मिन् चोदनोच्यते ॥

इति। तरल. पृ. १४.

12. नन्वभिधेयातिरिक्तं प्रतीयमानमेव नास्ति यदप्यस्ति तदभिधेयमेवेति मीमांसका । तत्रापि केचिदभिहितान्वयवादिनः केचिदन्विताभिधानवादिनस्तत्र तावदाद्यान् समादध्म इत्याह - अथेति । नैय्यायिकान् न्यायवेदिन मीमासकानित्यर्थः । तत्रापि भाट्टान् प्राभाकरान् वेत्याकाङ्क्षायां तावदभाट्टानाह - अभिहितान्वयवादिन इति - तरल. पृ. ३५.

13. ज्योतिष्टोमादिवाक्यस्थैः पदैः स्वाभिधेयसामान्यापर्यवसानादाकाक्षा सनिधियोग्यताबल लब्धैकवाक्यताव्यवस्थापितकारणत्वादिशक्ति युक्ता नियतव्यक्तीराक्षिपदिभ स्वार्था भिधानद्वारा तत्सम्बन्धितयेतर पदार्था लक्ष्यन्ते । तत्र दीर्घदीर्घतमवाक्येषु पूर्वपूर्वपदविस्मरणेऽपि वाक्यार्थसंवेदनदर्शनादनुसन्धीयमानैः पदार्थैरव वाक्यन्यक्कारेण स्वर्गयागादिसाध्यसाधनसम्बन्धरूपो वाक्यार्थोऽनेकपदार्थानुरक्त प्रतिपाद्यत इति तदभूताधिकरणसिद्धान्तसिद्धोऽर्थः। यथाहुः - "तस्मात् पदैरभिहितै पदार्थै लक्षणया वाक्यार्थः प्रतिपाद्यते"। इति।
तत्रैव. पृ. ३७.

14. तरल. पृ. ७७.

15. यद्विना वाच्यं न सिद्धयति तद्वाच्यसिद्धयङ्गमित्यर्थः। अत एवार्थस्य द्रव्यदेवतादिवत् करणशरीरनिर्वर्तकतया सन्निपत्योपकारकाङ्गस्य वाच्योपस्कारमात्रकारितया प्रयाजादिव दारादुपकारकादपराङ्गादभेदः । तत्रैव. पृ. १३६.

16. ननु किमिदमुच्यते विधेयस्य प्राधान्यमप्राधान्यमनुवाद्यस्येति। एवं चेद्दध्ना जुहोतीत्यत्रापि विधेयस्य दध्नः प्राधान्यमनुवाद्यस्य होमस्याप्राधान्यं चापद्येत । किं च वाजपेयाधिकरणपूर्वपक्षे वाजपेयेन स्वाराज्यकामो यजेतेत्यत्र धात्वर्थस्य यजेस्तन्त्रेण गुणफलसम्बन्धे विरुद्धत्रिकद्वयापत्तिं वदता सिद्धान्तिना विधेयस्य गुणत्वमनुवाद्यस्य प्राधान्यं चोक्तम्। तथा च वार्तिकम्। "ततः स्वफलेनोपादेयविधेयगुणभूतयागग्रहणादगुणेन चोद्देश्यानुवाद्य प्रधानभूतापेक्षणात्तन्त्रत्वाभावः" इति। तरल. पृ. १५२.

17. तस्माद्विधेयस्य प्राधान्यमप्राधान्यं चानुवाद्यस्येति न मीमासामासलं वच इति प्रतीम । नैष दोषः । इह विधेयस्य प्राधान्यं नाम तात्पर्यविषयत्वमात्रं अप्राधान्यं चानुवाद्यस्य । अतद्विषयत्वमात्रं न तु दधिहोमयोरिव पारार्थ्यहेतुकः शेषशेषिभावलक्षणः गुणप्रधानभाव

इति। तत्रैव. पृ. १५२.

18. यथा सह शाखया प्रस्तरं प्रहरतीत्यत्र प्रस्तरप्रहरणस्य प्रक्षेपात्मनः कृष्णविषाणप्रासनवदुपयुक्तसंस्कारस्य प्रतिपत्तिकर्मत्वेन हविरास नादिप्रयुक्तप्रस्तरवदेव वत्सापाकरणादिप्रयुक्तशाखायामपि विनियुक्तविनियोगप्रस ङ्गेनाप्रयोजकत्वात् प्रस्तरवच्छाखाया अपि तत्र प्राधान्यमेव नाङ्गत्वमिति निर्णीतं चतुर्थषष्ठयोस्तृतीयेऽङ्गत्वं चोक्तमिति चेन्नैष दोषः।............ततः शाखाप्रस्तरयोरिव शरशात्रवयोरपि शाब्द एव गुणप्रधानभाव इति सिद्धम्। तरल. कपृ. २५१-५२.

19. तरल.. पृ. २६९.

20. यथा "क्रमश्च देशसामान्याद" इति न्यायादैन्द्राग्न्यादिकाम्येष्टीनां तद्याज्यापुरोनुवाक्या युगलैः "उभावामिन्द्राग्नी" इत्येवमादिभिः यथा वा समिदादीनां प्रयाजादीनां तदनुमन्त्रणमन्त्रैः "वसन्तमृतूनाम्" इत्यादिभिरिति भावः। तत्रैव. पृ. ३०४.

21. तरल. पृ ६.

22. तरल. पृ ३६.

23. तरल. पृ ३७.

24. तरल. पृ. १५२.

25. तरल. पृ. ३८.

26. पदवद्वाक्यमपि वाचकमेवेति गुरूणां मतम्।
यथाहुस्तद्विदः -

वाक्येनैव हि वाक्यार्थः साक्षादेवाभिधीयते।
उपलक्षणतश्चास्य सम्बन्धग्रहसम्भव ॥

वाक्यं गोपदयुक्त यत् तत् सास्नादिसमन्वितम्।
वाक्यार्थं वदतीत्येवं व्युत्पत्ति सुकरैवं हि ॥
तत्रैव पृ. ३९.

27. नैषधीयचरितम् 5-39

28. शिशुपालवधम् 11-41

# ABBREVIATIONS & BIBLIOGRAPHY

एकावली (=एका.)
के.पि.त्रिवेदी
मुम्बई, १९०२.

कादम्बरी (=काद.)
आर.वि. कृष्णमाचार्यः
मद्रपुरी, १९५२.

तरलम् (=तरल.)
के.पि. त्रिवेदी
मुम्बई, १९०२.

नैषधीयचरितम् (=नै.च.)
हरगोविन्दशास्त्री
बनारस्, १९५४.

प्रतापरुद्रीयम् (=प्रता.)
के.पि. परब्
मुम्बई, १९२०.

रघुवंशः (=रघु.)
के.पि. परब्
मुम्बई, १९२०.

शिशुपालवधम् (=शि.व.)
हरगोविन्दशास्त्री
बनारस्, १९५५.

# 8 अपि मीमांसका मनोवैभववादिनः?

## उपोद्घातः

यथा चक्षुरादीनां बाह्येन्द्रियत्वं तथा मनसः अन्तरिन्द्रियतामातिष्ठन्ते संख्यावन्तः। तच्च सुखादिसाक्षात्कारौपयिकमित्यत्र नास्ति तावद्विप्रतिपत्तिलेशो विचक्षणानाम्। तत्परिमाणे परं विवदन्ते वादिनः 'किमिदं विभु मन उताण्विति?' तत्र मीमांसका मनोवैभववादिन इति महती प्रसिद्धिर्वरीवर्ति तावत्समाजेषु तत्त्वविदाम्। सा च प्रसिद्धिः किंनिबन्धना? कियदवधि च सा मूलग्रन्थसंवादं भजते तत्संप्रदाये?

मीमांसाशास्त्रे समुल्लसति भाट्टप्राभाकरभेदसुप्रसिद्धं प्रस्थानद्वितयम्। तत्र प्राभाकराः 'पुनः मनस आतिष्ठन्ते तावदणुत्वम्। भाट्टप्रस्थाने शास्त्रदीपिकायां पार्थसारथिमिश्रैश्च मनसोऽणुत्वमेव व्यञ्जितम्। प्रत्यपादि च गागाभट्टेन भाट्टचिन्तामणौ तथात्वमेव तस्य। चिदानन्द - नारायणावन्तरा न कोऽपि भाट्टमीमांसकः मनसः विभुत्वं प्रत्यपादयदिति प्रतिभाति।

अतः पत्रेऽस्मिन् मनोवैभववादः किं प्राचीनैरूरीकृतो वा उत अर्वाचीनैरुपकल्पितो वेति विमृश्य तस्य प्राचीनमीमांसकोपज्ञतां सोपष्टम्भं प्रतिपादयितुं यत्न आधीयते।

## २. मनसः परिमाणम्

स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहसुखादिप्रत्यक्षेच्छायुगप ज्ज्ञानानुत्पत्तिरूपैर्लिङ्गैः सिद्धयन्मनः अन्तःकरणम् अणुपरिमाणमेवेति बहुविदां बहुनामभिसन्धिः । अस्ति कश्चन वादः नेदं मनः अणु किन्तु विभ्विति । स च वाद इदम्प्रथमतया कैरुपस्थापित इत्यत्र न हि नाम किमपि विशदं प्रमाणमुपलभामहे वयम् । अद्यापि चारित्रिकदृष्ट्या सावधानं गवेषणीयोऽयमंशः समुपजाता नैकतन्त्रपरिचयैर्विद्वत्तल्लजैः ।

## २.१ दार्शनिकमतभेद :

आ सूत्रकारात् महर्षिमूर्धन्यात् गौतमात् अद्यावधि प्रहतोऽयं पन्थाः नैयायिकानां अणु मन इति । यत्सूत्रकारः कण्ठरवेणैव तस्याणुत्वं प्रत्यपीपदत् ।[1] तदनु चतुर्थशताब्दवासी वात्स्यायनो भाष्यकारः तस्याणुत्वं सम्यक् स्पष्टीचकार अव्यापीत्यादिदलैः ।[2] तदनुरोधमेव भारद्वाजोद्योतकरेण वार्तिककारेण मनसः क्रियाशीलिता अणुपरिमाणकृता प्रपञ्चिता ।[3] तात्पर्यटीकाकारेण वाचस्पतिमिश्रेण नात्र मनःपरिमाणविषये ऽतीव व्यवसितम् । इदमत्रावधेयं यत् - भाष्यकृता प्रयुक्तस्य अव्यापीति पदस्य प्रयोजनं वार्तिकटीकाकृद्भ्यां आत्मनः व्यापिद्रव्यस्य मनस्त्ववारणायेति प्रदर्शितम् । परिशुद्धिकारोक्तरीत्या सहकारिपदेनैव तदव्यावृत्तिलाभात् अव्यापीति पदं मनसः अविभुपरिमाणं मनसिकृत्यैव तेन प्रयुक्तं स्यात् । तेन तदुत्तरवाक्यमपि सार्थकं जागर्ति। परिशुद्धिकृता न्यायाचार्योपाधिविभासुरेण श्रीमता उदयनाचार्येणात्र विषये भूयान् प्रयासः स्वीकृतः। तेन न केवलं मनसः अणुत्वं व्यवस्थापितं किन्तु विभुत्ववादश्च निरस्तः । परिशुद्धिगताः पङ्क्तय एव पुनः न्यायकुसुमाञ्जलौ तृतीयस्तबके मनोवैभवखण्डनप्रस्तावे तेन यथावन्निवेशिताः । त्रयोदशशतकाब्दवासिना गङ्गेशोपाध्यायेन तत्त्वचिन्तामणौ मनसः विभुत्वसाधकहेतून् निरस्य तस्याणुत्वं सम्यक् न्यरूपि (त.चि. ८२३) । एवमेव नव्यैरपि नैयायिकैः तस्याणुत्वमेव तत्र तत्र ग्रन्थेषु व्यवस्थापितम् । [ITK 100]

महर्षिणा कणादेनापि कण्ठरवेणैव मनसः अणुत्वमभिहितं वैशेषिकदर्शने[4] । विभवभावस्याणुपरिमाणत्वाव्यभिचारादअणुपरिमाणमेव मन इति तदनुयायिभिरपि प्रशस्तपाद - शंकरमिश्रादिभिः अणुत्वमेव तस्य सुष्ठु प्रपञ्चितम्[5] [वै.सू. ३.२०२

-२०३] । बौद्धैः जैनैश्च तस्य मध्यमपरिमाणत्वमूरीकृतमित्यन्यदेतत् [6] ।

विलसति सुप्रसिद्धं प्रस्थानद्वितयं पूर्वमीमांसाशास्त्रे भाट्टप्रस्थानं प्राभाकरप्रस्थानञ्चेति । तत्र प्राभाकरप्रस्थानशिरोमणिना शालिकानाथेन अष्टमशताब्दनिवासिना प्रकरणपञ्चिकायां नैयायिकाभ्युपगतं मनसो ऽणुत्वमेवाभ्युपागामि (प्र.प. १४९) ।

## मनोवैभवसाहित्यम्

मनसो वैभवं साधयन्तौ द्वावेव भाट्टमीमांसकौ गुरुशिष्यौ चिदानन्दपण्डितनारायणौ नीतितत्त्वाविर्भावमानमेयोदयकारौ समुपलभ्येते । तत्र नीतितत्त्वाविर्भावे चिदानन्दपण्डितेन मनोवैभवसाधकान्यनुमानानि समुपन्यस्तानि । तत्रैव तावत् उदयनाचार्योक्तिदूषणान्यपि समाहितानि। सर्वथा तन्मार्गानुगामी नारायणः मानमेयोदये मनोवैभवसाधकानि अनुमानानि प्रदर्शयामास [7] । कुमारिलमतोपन्यासाख्येऽविदितकर्तृके लघुग्रन्थे मनोवैभववादः भाट्टानामेवेत्येवमुपलभ्यते यथा -

कौमारिलानामेवास्ति मनसो वैभवं भुवि (कु.म.७) इति ।

## २.२ अन्यग्रन्थानुवादः

एवमेव तत्त्वचिन्तामणिव्याख्याने प्रकाशाख्याने षोडशशताब्दभवेन रुचिदत्तेन प्रणीते मनोवैभववादः भाट्टानामिति समुपलभ्यते । यथा -

तच्च विभु ज्ञानसमवायिकारणसंयोगाधारत्वात्, नित्येन्द्रियत्वात्.... इत्यादि मणिग्रन्थस्य मनो वैभवानुवादकस्यावतरणिकां विरचयन् रुचिदत्तमिश्र एवं लिखति -

"भाट्टमतमाह- तच्चेति" [त.च. ८२३] इति ।

एतावता इदमवधार्यते यत् मनोवैभववादः भाट्टानामिति नैयायिकैरपि रुचिदत्तमिश्रसमये षोडशशताब्दे समभ्युपगत इति ।

तथैव वैशेषिकसूत्रोपस्कारे शङ्करमिश्रोऽपि मनोवैभववादिनः मीमांसका इति तान्निर्दिशति । एवञ्च न्यायकुसुमाञ्जलिव्याख्यायां विस्ताराख्यायामपि

प्रागुक्ततृतीये स्तकबके मनोवैभवसाधकयुक्तिनिरासावसरे व्यलेखि चैवं श्रीमद्भिः वीरराघवाचार्यैः यथा मनसो विभुत्वं वदतां मीमांसकानां नेदं सम्मतमिति [न्या. कु. १४८] इति।

## ३. प्राचीनभाट्टमतपरिशीलनम्

एवंस्थिते भाट्टमतानुयायिनः कति वा प्राचीनाः मनोवैभववादमभ्युपाजग्मुरिति परिशीलनीयम्। तत्र नातीव भाट्टग्रन्थेषु प्राचीनेषु इमं वादमधिकृत्य समुप लभ्यते ।

## ३.१ पार्थसारथिमिश्रमतम्

भाट्टप्रस्थानधौरेयेण एकादशशताब्दीनिवासिना पार्थसारथिमिश्रेण शास्त्र दीपिकायां मनसः न विभुत्वं स्थापितमपि तु अविभुत्वमेव तदिष्टमिति तत्पङ्क्तिपरिशीलनेनास्माभिः अवधार्यते। यथा -

> मनस्तु पृथिव्यादीनामेवान्यतमात्मकं तेभ्यः अन्यद्वा सर्वथा तावदस्ति मनः । तच्चात्मतद्गुणेष्वेव स्वतन्त्रं प्रवर्तते न बाह्येषु रूपादिष्वित्यान्तरमित्युच्यते। रूपादिज्ञानादिष्वपि तच्चक्षुरादिसहायं प्रवर्तते। एवमनुमानादिष्वपि लिङ्गादिसहायम्। अन्यमनस्कस्य सम्प्रयुक्तेष्वपि रूपादिषु ज्ञानानुत्पत्तेः। [शा. दी. ३६]

इति। अत्रान्यमनस्केत्यादिप्रयोगदर्शनात् अन्यमनस्कत्वं अणुतादशायामेव युज्यत इति तस्यापि मनसः अणुतायामेव नैर्भर्यमिति गम्यते।

## ३.२ गागाभट्टभणिति :

भाट्टचिन्तामणिकर्त्रा भाट्टमीमांसकवरेण्येन गागाभट्टेनापि मनसः अणुत्वं कण्ठरवेणैव प्रत्यपादि। यथा -

> तच्चान्तरिन्द्रियं स्वातन्त्र्येण आत्मतद्योग्यगुणतद्गतजातिमात्रग्राहकं बाह्यविषयेषु तस्य स्वातन्त्र्याभावात्। कुतो न स्वातन्त्र्यमिति चेन्न। तस्याणुपरिमाणस्य देहादबहिर्भावाभावेन सन्निकर्षसंभवात्। युगपद्ज्ञानानुत्पत्तिश्च मनसोऽणुत्वे प्रमाणम् [भा.चि.१६] इति।

## ४. उदयनपरामर्शः

एवं स्थिते उदयनाचार्येण एकादशशताब्दनिवासिना न्यायसूत्रव्याख्याने टीकापरिशुद्धिसमाख्याने प्रथमं मनोवैभववादः उपक्षिप्य महता प्रबन्धेन निरस्तः [४] । स एव खण्डनग्रन्थसन्दर्भः अक्षरशः न्यायकुसमाञ्जलावपि साग्रहं मनोवैभवखण्डनावसरे तृतीयस्तबके सम्यक् तेन निवेशितः । उदयनाचार्येण दर्शितेनैव मार्गेण गङ्गेशोपाध्यायः तत्त्वचिन्तामणौ प्रत्यक्षखण्डे मनोवैभवयुक्तीः प्रतिचिक्षेप ।

## ५. प्रसिद्धि :

इत्थंभूते वस्तुनि मनोवैभववादः मीमांसकानामिति या प्रसिद्धिः लब्धप्रचारा सा किंनिबन्धनेति तावज्जायते संदेहः । प्राभाकराः अणुत्ववादिन इत्यवधारणात् प्राचीनभाट्टग्रन्थेषु तदनुपलम्भाच्च । न हि नाम प्राचीनभाट्टग्रन्थेषु मनोवैभववादः उपलभ्यते कुत्रापि । प्रत्युत पार्थसारथिमिश्रः मनसः अणुत्वमेव मन्यत इति पूर्वोक्तग्रन्थसन्दर्भेण अवगम्यते । तर्हि दुरूहोऽयं प्रश्न उदेति यत्-अपि मीमांसका मनोवैभववादिनः ? इति । यदि मीमांसका न मनोवैभववादिनस्तर्हि तावदुदयनपरामर्शस्य गङ्गेशरुचिदत्तादिनैयायिकानुवादानाञ्च को हेतुरिति ? यद्युदयनः तदानीन्तरेषु केषुचिन्मीमांसाग्रन्थेषु मनोवैभववादं नाद्रक्ष्यत् तर्हि स्वपरिशुद्धौ न्यायकुसुमाञ्जलौ च तन्मततया तं नैव निरदेक्ष्यत् । अतः नेयं प्रसिद्धिः केवलार्वाचीनग्रन्थनिबन्धनेति विज्ञायते ।

## ६. उपसंहारः

इत्थं सूक्ष्मेक्षिकया न्यायमीमांसाचारित्रकदृष्ट्या परिशीलने क्रियमाणे निर्गलितोऽसावर्थः ममैवं प्रतिभाति यत् प्रथमं केषुचन भाट्टमीमांसाग्रन्थेषु मनोवैभववादः सम्यक् प्रतिपादितः प्रचारितश्च । ये च ग्रन्थाः उदयनाचार्यसमये एकादशशताब्दे लब्धप्रचाराः तदनन्तरं कालगर्भे निलीनाः यांश्च दृष्ट्वा आचार्य उदयनः स्वग्रन्थयोः मनोवैभववादं सोपष्टम्भं खण्डयामास । पश्चात् भाट्टैरपि कैश्चित् मनोवैभववादः नाभ्युपगतः । तदेकदेशिभिरेवाभ्युपगतः । अत एव वादद्वयमपि भाट्टग्रन्थेष्वेव अस्माभिः परिदृश्यते । अर्वाचीनैः चिदानन्दनारायणप्रभृतिभिः षोडशशताब्दवासिभिः पाठपरम्पराप्राप्तः अथवा तत्कालमीमांसाग्रन्थद्वारा समुपलब्धो वा खण्डनग्रन्थपरामृष्टो वा स

वादः पुनः स्वग्रन्थेषु भाट्टसिद्धान्ततया समर्थितः। तस्मादेव रुचिदत्तादिभिः स्वव्याख्यानेषु मनोवैभववादः भाट्टानामिति व्यलेखि । अतः वादोऽयं न केवलमर्वाचीनैः भाट्टैरुपकल्पितः । किन्तु प्राचीनभाट्टसम्प्रदायपरिप्राप्त एवेति तर्क्यते । एतत्सिद्धान्तमुपोद्बलयन्ति न्यायादीतरशास्त्रग्रन्थेषु मीमांसकपक्षतया तस्यानुवादभागाः। एवं समासादितशास्त्रीयसामग्रीबलात् चारित्रिकपरिशीलनेन च प्राचीनैरेव भाट्टैः उपस्थापितः मनोवैभववादः। अतः भाट्टमीमांसका मनोवैभववादिन इति निर्णयन्तो वयं मन्यामहे नापभाषिणः स्मः ॥

NOTES :

1. यथोक्तहेतुत्वाच्चाणु इति न्या. द. ३-२.६०

2. अस्ति तत्तदिन्द्रियसंयोगि सहकारि निमित्तान्तरमव्यापि, यस्यासन्निधेर्नोत्पद्यते ज्ञानं, सन्निधेश्चोत्पद्यत इति न्या. भा. ४३७.

3. यदि तर्हि चक्षुरादीन्द्रियं मनस्सन्निधानापेक्षमर्थानामयुगपद्ग्राहि य एकेन्द्रियग्राह्यास्तेषु कथमयुगपद्ग्रहणम् ? न हि तत्रासन्निहितं मन इति न्या.वा. ४४०

4. तदभावादणु मनः इति वै. द. ७. १. २३.

   अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवन अणूनां मनसश्चाद्यं कर्म अदृष्टकारितम् इति वै. द. ५. २. १३.

5. तदभावचनादणुपरिमाणम् । अपसर्पणोपसर्पणवचनात् संयोगविभागौ । मूर्तत्वात् परत्वापरत्वे संस्कारश्च । ..........क्रियावत्वात् मूर्तत्व प्रयत्नादृष्टपरिग्रहवशादाशुसञ्चारि चेति । प्र. भा. ३६-३७

6. With the Buddhists and the Jains it is mediumsized (Madhyama Parimana) ITK 101

७. सुखाद्यपरोक्षसाधनेन्द्रियत्वेन कल्प्यमन्तरिन्द्रियं विभुपरिमाणमस्पन्दं च मनः । अणुपरिमाणं चञ्चलं च मनः इति केचिदूचिरे। तदसङ्गतम्। मनो विभु, स्पर्शानर्हद्रव्यत्वात् अनारभ्यारम्भकद्रव्यत्वात् वा, ज्ञानासमवायिकारणसंयोगाधारत्वाद्वा, आत्मवत् इति मा.मे. २१४

8. ननु मनो विभु सर्वदा स्पर्शरहितद्रव्यत्वात्, विशेषगुणशून्यद्रव्यत्वात्, नित्यत्वे सत्यनारम्भकद्रव्यत्वात्, ज्ञानसमवायिकारणसंयोगाधार - इत्यादेः । तत्कथमुच्यते - अत्र्यापीति नैतदेवम्, सर्वेषामेवापाततः स्वरूपासिद्धत्वात्। तथाहि- यदा सुखाद्युपलब्धीनां क्रियात्वेन करणतया मनोऽनुमितं, तदा न द्रव्यत्वसिद्धिः ।अद्रव्यस्यापि करणत्वात्, अथासामेव साक्षात्कारितया इन्द्रियतया तदनुमातव्यम्, तथापि व्यापकस्य निरुपाधेः नेन्द्रियत्वमित्युपाधिर्वक्तव्यः । तत्र यदि कर्णशष्कुलीवन्नियतस्य शरीरावयवस्योपाधित्वं, तदा तावन्मात्रे वृत्तिलाभ । तद्दोषे च वृत्तिनिरोधः श्रोत्रवत् प्रसज्येत । ततः शरीरमात्रमुपाधिः अभिधेय । तथा च तदवच्छेदेन वृत्तिलाभे "शिरसि मे वेदना पादे मे सुखम्" इत्याद्यव्याप्यवृत्तित्वप्रतीतिविरोध । असमवायिकारणानुरोधेन विभुकार्याणां देशनियमात्. .... ...... .........यदि तु मनसो वैभवेऽपि अदृष्टवशात् क्रम उपपद्यते, तदा मनसोऽसिद्धेः आश्रयासिद्धिरेव वैभवहेतूनामिति । टीका. परि. ४४२.

## BIBLIOGRAPHY & ABBREVIATIONS


कारिकावली (= कारि.)
शङ्कररामशास्त्री, सि.
मद्रास्, १९२३.

कुमारिलमतोपन्यास (= कु.म )
पिल्लै एस् के
त्रिवेन्ड्रम्, १९२६

तत्त्वचिन्तामणि (= त.चि.)
रामानुजताताचार्य, एन्.एस्
तिरुपति, १९७३.

तन्त्ररहस्यम्
रामस्वामिशास्त्री, के.एस्
बरोडा, १९५६.

तन्त्रसिद्धान्तरत्नावली (= त.सि र )
पट्टाभिरामशास्त्री, पि.एन्.
बेनारस्, १९४४

नीतितत्त्वाविर्भाव (=
पिल्लै, पि.के.एन्.
त्रिवेन्ड्रम्, १९५३

न्यायकुसुमाञ्जलिः (= न्या.कु.)
वीरराघवाचार्यः
तिरुवाडि, १९४१.

न्यायदर्शनम् (= न्या.द.)
अनन्तलालठक्कुर
दर्भाङ्गा, १९६५.

न्यायमञ्जली (= न्या.म.)
सूर्यनारायणशुक्ल
वाराणसी, १९५१.

प्रकरणपञ्चिका (= प्र.प.)
सुब्रह्मण्यशास्त्री, ए.
काशी, १९६१.

भाट्टचिन्तामणि· (= भा चि )
सूर्यनारायणशुक्ल.
बनारस्, १९३४

मानमेयोदय· (= मा.मे )
कुन्हन्राज·, सि.
मद्रास्, १९३३.

वैशेषिकदर्शनम् (= वै द.)
ढुण्ढिराजशास्त्री,
काशी, १९२३.

वैशेषिकसूत्रोपस्कार (= वै सू उ.)
ढुण्ढिराजशास्त्री,
काशी, १९२३.

*.....*.....*